❀ श्रीगौरहरिर्जयति ❀

# भक्तभूषणसन्दर्भः

ब्रजाचार्य्य—

## ाहामहिमश्रीश्रीनारायणभट्टविरचितः


ा २०२१

ृत्ति ५००

ूल्य १)

प्रकाशक व मुद्रक—

कृष्णदास बाबा

गौरहरि प्रेस, कुसुमसरोवर, राधाकुण्ड

# भक्तभूषणसन्दर्भः

नित्यगुणाश्रयमीशं प्रकटितरसिकं च विश्वमाक्रीडम् ।
भजनरसाश्रयमानैर्गम्यं पश्यन् जनो जयति ॥१॥
भक्तालङ्कृतिसन्दर्भे प्रोक्तं प्रकरणं त्रयम् ।
कृष्ण-भक्त-जगद्वाचि क्रमेणैव विचार्यते ॥२॥

ईशं सर्वगुणाश्रयं, प्रकटितरसिकं नित्यसिद्ध एव प्रकटित आविर्भूतो यो रसिकस्तं,विश्वं चाक्रीडं क्रीडोपकरणं पश्यन् जनः भक्तः जयति रसास्वादकतया विराजत इत्यर्थः । कीदृशं ईशं विश्वं च ? भजनरसाश्रयमानैर्गम्यं भजनरसं आश्रयन्ति यान्यनुमानानि प्रत्यक्षादिप्रमाणानि तैर्गम्यं विषयीकृतमास्वाद्यं च । तत्रेशे केचिद्रूप-रस-गंध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग- विभाग-परत्वापरत्व-गुरुत्व- द्रवत्व-स्नेह-शब्द-बुद्धि-सुख दुःखेच्छा- द्वेष-प्रयत्न- धर्माधर्म-गुणवत्वं वदन्ति । सांख्याः कूटस्थत्वं, तत्तु न शिष्टादरणीयं यथात्वस्य श्रुतावनुक्तेः । न च सांख्यादीनां गुणत्वं श्रूयते, न च कूटस्थत्वे भक्तवात्सल्यादयः संभवंति । ततश्च श्रुतिपुराणप्रसिद्धा ये गुणास्तद्वत्वं ज्ञेयम् । तत्र केचित् "अगोत्रमवर्णमचक्षुःश्रोत्रं निष्कलं निष्क्रियं निरञ्जनं निष्कलं निलयनो अस्थूलमणुबिरजो बिमृत्युविशोको बिजिघत्सो विपासः" "यतो बाचो निवर्त्तन्ते" "कूटस्थेपीश्वरे आत्मे"त्यादिवाक्यैः कूटस्थत्वं निर्द्धर्मकत्वमिति वदन्ति । तत्र पृच्छामः- निर्द्धर्मकस्य लोकवेदाप्रतीतेः बंध्यापुत्रवत् । किञ्च निर्द्धर्मकत्वं वेदादिप्रमाणगम्यं न वा? प्रमाणगम्यं चेदागतं सधर्मकत्वमेव । नहि निर्द्धर्मकत्वं कुत्रापि प्रमीयते । निर्धर्मके वस्तुनि सधर्मकत्वप्रतिपादने वेदस्याप्रामाण्यं स्यात् । न च "याजमानोऽयं प्रस्तर" इत्यत्र यथा यज्ञसाधनधर्मवति धर्मे बाधितेऽपि प्रस्तरशब्दः साधनधर्मपरः प्रमाणसहकृतेन बाक्येन यजमानः प्रस्तरः यज्ञसाधनं तद्वदत्रापि सर्व-

स्य वशी सर्वस्य कर्त्तेत्यादौ बाधकवाक्यान्तरसहकृतेन धर्मबाधे वाक्यार्थसंकोचाल्लक्षणया निर्धर्मकत्वे पर्य्यवसानं भविष्यतीति वाच्यं। न चेदस्याप्रामाण्यमिति वाच्यं। धर्म्मि-धर्म्मभावस्य प्रामाणिकत्वे न कुत्रापि भवतानभ्युपगमात्। कल्पितधर्मबाधे सत्यकाम इत्यादौ सत्यादिपदबाधः स्यात्। नहि निर्धर्मकब्रह्म-बोधने सत्यादिपदमनुकूलं प्रत्युत प्रतिकूलमेव। किञ्च कुत्रापि प्रामाणिकत्वे सिद्धे कल्पितत्वं सिध्यति अन्यथा कल्पकप्रमाण-स्यापि मिथ्यात्वेन कल्पितत्वस्यैवासिद्धेः, ओमिति चेत्तर्हि ब्रह्म-णोऽपि कल्पितत्वे शून्यमेवावशिष्टं स्यात्। निर्धर्मकस्वप्रकाशे स्वतःसिद्धे ब्रह्मणि नान्यापेक्षेति न शून्यतेति चेन्न, "अथातो ब्रह्मजिज्ञासा" "सोन्वेष्टव्यः स विजिज्ञासितव्य" इत्यादि श्रुति-स्मृति सूत्र- गुर्वाद्युपदेशानर्थ्यं स्यात्। किञ्च वेदस्य प्रामा-ण्यमप्रामाण्यं वा प्रामाण्येऽद्वैतासिद्धौ सधर्मकत्वं, अप्रामाण्ये बौद्ध-मतप्रवेशजजगदान्ध्यं च स्यात्, प्रवृत्त्येकवेदस्याप्रामाण्यात् "तस्मा-द्वा एतस्मादात्मनः आकाशः संभूतः" "सर्वं खल्विदं ब्रह्म" "ऐतदा-त्म्यमिदं सर्वं" "एष एव साधुकर्म्म कारयति यमूर्द्ध्वं मुन्निनीषति एष एवासाधुकर्म कारयति यमधो निनीषति" "पापः पापेन कर्मणा भवति साधुकारी साधु भवति" इत्यादि प्रवर्त्तकवाक्यानामान-र्थक्यं स्यात्। अज्ञ- प्रतीत्यादिपरिपाटी प्रतारणमात्रं तदुक्तं भास्करभाष्ये- "नहि रूपमनंधानामसत्यं तेष्वसद्भवेत् तन्मते स्वप्रकाशब्रह्मातिरिक्तस्याभावात्। नच "न निरोधो न चोत्पत्ति-र्न च बंधो न साधकः। न मुमुक्षुर्नवै मुक्त इत्येषा परमार्थता" इति वाच्यं, तस्यैव उल्लूकवदुपेक्षणीयत्वात्तथोक्तं "न च कार्य्ये प्रतिपत्त्यभिसंधिः" अस्मिन्नधिकरणे भाष्यकारेण-" नहि निर्गुणं वस्तु विद्यते, नहि प्रकाशादिप्रत्याख्याने अग्निर्नाम, नापि द्रव्यप्रत्याख्याने गुणो नामास्ति। यदि चेत्तन्मात्रं ब्रह्म तर्हि आनन्द-- गुणोपदेशे व्यर्थता स्यात्। सर्वज्ञत्वं सर्वशक्तित्वं सर्व-

कर्तृत्वमित्यादयो गुणाः परस्यासाधारणा" इति फलाध्याये कंठोक्तत्वात् । यदि चास्मादुक्तजीवभेदप्रतिपादकप्रामाण्येष्वस्मदुक्ताभासैरेव दूषणमुच्यते त्वया तह्यर्स्माभिरपि तवोक्त प्रबोधप्रमाणानां त्वां प्रति तव मते मिथ्यात्वेऽपि ह्युच्यमाने भेद एव प्रमाणिक इति। पदार्थस्तु सर्वस्य मिथ्यानुसंधानेन रागादिराहित्यं ततः भगवत्स्फुरणमिति। न निरोध इत्युक्त्वा वीतरागभयक्रोधै मुर्निभिरिति मध्ये उक्त्वा तत्वीभूतस्तदा रामस्तत्वादप्रच्युतो भवेदिति उपसंहृतम्। अन्यथा ब्रह्मीभूत इति स्यात्। विषं भुंक्ष्वेतिवत्। वैराग्यार्थमेव सर्वस्य मिथ्यात्वमुच्यते न तु तथा,तथा श्रुत्यन्तरे- विद्वान्परात्परं पुरुषमुपैति दिव्यमित्युक्तं न तु परपुरुषो भवत्युक्तमिति। तस्मात् "विशोको विजिघत्सोऽविपासः सत्यकामः सत्यसंकल्पः नित्यं विभुं सर्वगतं सूक्ष्मं द्रष्टा श्रोता रसयिता घ्राता बोद्धा मंता कर्ता विज्ञानात्मा" "तमीश्वराणां परमं महेश्वरं,, सर्वकर्मा सर्वकामः सर्वरसः" इत्यादिगुणा सिद्धाः। विष्णुधर्मोत्तरे च-

"गुणाः सर्वेऽपि युज्यन्ते स्वैश्वर्यात्परमेश्वरे ।
दोषाः कथञ्चिन्नैवात्र युज्यन्ते परमो हि सः ।
गुणदोषौ माययैव केचिदाहुरपण्डिताः" ।

कल्पितधर्मवादिनो मूर्खा इति हृदयम् ॥

श्रीभागवते साम्यासंगादयो गुणाः अगुणा गुणपरिणामरूपा न नित्या इत्यर्थः ।

सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् ।
शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ।
ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो वलं स्मृतिः ।
स्वातन्त्र्यं कौशलं कान्ति धैर्यमार्दवमेव च ।
प्रागल्भ्यं प्रश्रयः शीलं मह ओजो वलं भगः ।

गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः ।
इमे चान्ये च भगवन्नित्या यत्र महागुणाः" ॥

इत्यादि । श्रुतिस्मृतिश्रीभागवतादिप्रतिपादितनित्यगुणवत्त्वं सिद्धम् ॥१॥

ननु "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" "विज्ञातारमरे केन विजानीयां" "स्वयं ज्योतिः स्वप्रकाश" इत्यादिभिर्निर्धर्मकत्वमायातीति चेन्न । "सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयात्मानंदः परः प्रत्यगेकरसः प्रमाणैरेतैरवगत" इति महोपनिषदि सर्व प्रमाणगम्यत्वोक्तेर्यत इति विज्ञातारमिति स्वयं ज्योतिरित्यादिवाक्यैरेव सधर्मकत्वं सिद्धं । तथोक्तं भाष्यकारेण प्रथमचरण-"आनन्दगुणस्य ब्रह्मणो विवक्षितत्वात् अतएवोत्तरोत्तरकेवलेन गुणवचनेन गुणी निर्दिश्यते सैवानन्दस्य मीमांसा" इति । द्वितीयाध्याये च विवक्षितगुणोपपत्तेश्चास्मिन्नधिकरणे गुणवत्त्वमुक्तम् । विवक्षिताः कथिता ये च गुणाः सत्यसंकल्पादयः ते ब्रह्मणि उपपन्नं (उपपत्तेः) उपपद्यन्ते युक्ता इत्यर्थः । अन्यथा खपुष्पकृतशेखरोऽयं बंध्यापुत्रः स्वप्रकाश इति वाक्यादपि निर्धर्मक-बंध्यापुत्रसिद्धिः स्यात् । यतो वाचो निवर्त्तन्त इत्यादिवाक्यानां तु स्वरूपानन्त्याद्गुणानन्त्याच्च, तमप्राप्य निवर्त्तन्ते न तु प्राप्तेरभावोऽन्यथा यत ईश्वरादिति व्याख्यानं न स्यात् । ततश्च यथा युधिष्ठिरस्य यत्किंचित्प्राप्तावपि राज्यप्राप्तिरेवोच्यते तथात्रापि । तथाहि "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सहे"त्युक्त्वा "आनन्दमेव जीवस्य यो ज्ञात्वा मुच्यते बुधः" जीवेश्वरस्यानन्दस्य यत्किंचिदानन्दं ज्ञात्वा मनसा सहानुभूय मुच्यते । भाष्यकारकंठोक्तिश्च प्रथमचरणे-"यतो वाचो निवर्त्तन्त इति च रागादिदूषितयोर्वाङ्मनसयोरगोचरं ब्रह्मेत्यर्थ इति" । उपसंहारे च क्षीरे सर्पिरिवेति दृष्टान्तेन पूर्णत्वमुक्तम् ।

अतो वचनमनसोः परिच्छिन्नमात्रत्वात्तस्य च पूर्णत्वात् यत्किंचित्प्राप्तिरेवाप्तिरिति ॥२॥

किञ्च "सत्यज्ञानमानन्दं ब्रह्म" "सत्यं ज्ञानमनन्तं" "सत्यं ज्ञानमानन्दं ब्रह्मेति" अखण्डनिर्द्धर्म्मकवाक्यार्थे पर्यायत्वेन पदानां व्यर्थता स्यात्। नहि घटः कलश इति प्रेक्षावद्वाक्यं दृष्टं प्रवृत्तिनिमित्ताभावादपि अर्थबोधकाभावादपि व्यर्थता स्यात् न वासत्याज्ञातानां तेभ्यो भिन्नमिति असत्यत्वादि प्रवृत्तिनिमित्तेनाखण्डार्थे पर्य्यवस्यतीति वाच्यं अन्यथातिप्रसंगः स्यात्। अदृश्यत्वादिगुणको धर्मोक्तेरिति सूत्राच्च उक्तं च भाष्यकारेण फलाध्याये-नहि चैतन्यमात्रमानन्दः न च दुःखनिवृत्तिमात्रमानन्दः तस्मात्स्वयं संविदितमेव सुखं सर्वदा मुक्तस्याभ्युपेयमिति ॥३॥

ननु घटभावाभावत्वेन यथा घटः प्रतीयते तद्भविष्यतीति चेत् यत्किञ्चिदेतत् घटाभावाभावत्वं घटे स्वीक्रियते। तत्तु घटत्वं वा अभावात्मकं धर्मान्तरं वा। नहि ब्रह्मणि त्वया धर्मः स्वीक्रियते न च "यदा ह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयं भवतीति" भेदज्ञानवतो भयमुक्तमिति वाच्यं अनवबोधात्। अयमर्थः "यथा ह्येवैषः एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवती"त्यभयप्राप्तिहेतुत्वेन ब्रह्मणि या प्रतिष्ठोक्ता तस्याः विच्छेदे भयं भवतीति। ततश्च ब्रह्मनिष्ठाविच्छेदे भयमित्यर्थः। अतएवोक्तं "सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः। यन्मुहूर्त्तं क्षणं वापि वासुदेवं न चिन्तयेदि"त्यादि वस्तुतस्तु लोके वेदे च संनिधानाभाव एव अन्तरा शब्दवाच्यः। अन्तराशब्दस्तु संनिधानवाचकः। लोके यथाधिकारी सेवनक्रियया राज्ञः अनन्तरः। यथा लक्ष्मीः पार्वती च श्रीनारायणशिवयोरनन्तरा। तदुक्तं भागवते

ध्रुवं प्रति कुबेरवाक्यं-"वृणीहि कामं नृप यन्मनोगतं मत्तस्त्वमौत्तानपदे विशंकितः। यतो वरार्हो स्याच्युतपादद्वयोरनन्तरं त्वां वयमंग शुश्रुमः ॥४॥

ननु "ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेदाहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन् ऋषि र्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यादि"वाक्यश्रवणान्निर्धर्मकत्वं प्रपंचस्य तु मिथ्यात्वं ततश्च वामदेवत्व-सूर्यत्व-मनुत्वादीनां प्रपञ्चात्मकत्वात् तद्बाधे ब्रह्माहमस्मीति सेत्स्यतीति निर्द्धर्मकत्वसिद्धिरितिचेन्न प्रतीकोपासनत्वेन फलवत्वात् परकायप्रवेशवत् तथाहि "तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्येषा संभवतीति" "अजन्मनि इमं स्वप्नं प्राभवं भवति स्वयमिति" स एवाहमस्मीत्येवं ध्यायेत् इति" वाजसनेये श्रूयते। ब्रह्मणो महिमानमाप्नोतीत्युपनिषत्। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमसाम्यमुपैतीतिकौषीतकिः। "जयतीमान् लोकान् हंति पाप्मानं" इत्यादि च फलश्रवणात् शाखान्तरे च यथेषीका तूलमग्नौ प्रोक्तं प्रदूयेतैवं हास्य सर्वेपाप्मानः प्रदूयंते। चोपासनार्थमभेदः न तु वस्तुतोऽतः सर्वधर्मकत्वं अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मेति कंठोक्तमनुच्छित्तिधर्मत्वं। तथा अलातशान्त्याख्योपनिषदि- "जरामरणनिर्मुक्ताः सर्वधर्माः स्वभावत" इति। अथर्वशिरोपनिषदि च-"आत्मज्ञानेन योगैश्वर्येण महति महीयते तस्मादुच्यते भगवानिति"। तृतीये च-"यत्र चास्ते पुमानाद्यः भगवान् शब्दगोचरः इति" ॥५॥

न च ब्रह्म वेद ब्रह्मैव भवतीत्यादि वाक्यस्वारस्यादैक्यमिति वाच्यं अनवबोधात्। तथाहि निराकारस्याविषयत्वात्साकारे

पर्यबसानं ततश्च साकारमादृश्यं तद्धर्म्मैबाप्राप्नोति। यथा पुरंजनः पुरंजनीध्यानात् स्त्रीत्वं न त्वात्मैक्यं "अन्ते या मतिः सा गतिरिति" च तथा च श्रुतिः-"यथा क्रतुरस्मिन् लोके पुरुषो भवति" इति एबमत्रापि ज्ञेयं। तथा गीतायां च "इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः। सर्गेऽपि न प्रजायन्ते प्रलये न व्यथन्ति चे"त्यादि। धनज्ञानबतां हि धनभेददर्शनात्। अन्यथा धनत्वमेव स्यात् कीटभृंगे तथा दर्शनात् नहि कीटः भृंगो भवतीत्यपि तु किंचिद्धर्म्मवान् अपि च श्रूयते ब्राह्मणपूजकानां बैराग्यादिधर्मवतां शूद्राणां ब्राह्मणत्वं ततश्च तेषु ब्राह्मणधर्मसाम्यं न तु ब्राह्मणत्वं। "तं देवा ब्राह्मणं बिदुरिति"। तथोक्तं पाद्मे माघमाहात्म्ये-"ब्रह्माहमिति गायन्ति ये च त्वैकचरा द्विजाः। पश्यन्तो हि त्वया तुभ्यं देहं तं नौमि माधबम्"। भारते-संपूज्य ब्राह्मणं भक्त्या शूद्रोऽपि ब्राह्मणो भवेदिति च। अतएवोपदेशोपनिषदि भेद एव पर्यबसानमुक्तम्। बीत-राग-भय-क्रोधैर्मुनिभिर्वेदपारगैः। निर्बिकल्पो ह्ययं दृष्टः प्रपञ्चो परमोऽद्वय इति ब्रह्म वेद ब्रह्मैब भबतीत्यर्थबादः शोकनिबृत्तिः, फलं यथेश्वराज्जीबो भिन्नस्तथा जीबादीश्वरो भिन्नः। तथोक्तं साधनाध्यायचतुर्थपादे- अधिकोपदेशात्तु बादरायणस्यैबं तद्दर्शनात्। अधिकः जीबात् कुतः उपदेशात्। सत्यज्ञानानन्दत्वेन अतः जीबः संसारी तत्प्रसादादानन्दं प्राप्नोतीति। ॥६॥

अत्र केचिन्नोदयन्ति "उपक्रमोपसंहारमभ्यासोऽपूर्वताफलं। अर्थबादोपपत्ती च लिंगतात्पर्य्यनिर्णये" इति षड्बिधचिन्हस्य श्वेतकेत्वाख्याने प्रचेतकेत्वाख्याने बिद्यमानत्वान्नव कृत्वोभ्यासेनैक्यमेब, नैब बाचा न मनसा प्राप्तुं शक्यः न चक्षुषा तत्बमसि श्वेतकेतो इति अतोन्यदार्तमित्यादि च श्रुत्या निर्धर्म्मकत्वेनैक्यं प्रपञ्चस्य मिथ्यात्वमिति-तत्र भ्रमः-

"प्रारम्भे च समाप्तौ च नैकत्र्यं दृष्टं स्वशब्दतः।
बाधितार्थं कथं वेदः पिता वा बोधयेदिति ।
चैतन्यं वा शरीरं वा किं बोध्यतेऽत्र संमतम् ।
चिदेकं निगु णं शुद्धं शरीरं मलिनं जडम् ।
बोध्यबोधकबुद्धीनां भेदो नैव प्रदृश्यते ।
भेदाभेदौ बिहायैव नित्यानित्ये तथैब च ।
चेद्विचारः प्रवृत्तोऽयं मानं तत्र मयोच्यते ।
अधीत्य वेदशास्त्रं तु श्वेतकेतुर्गृहं गतः ।
न्यायशास्त्रबलोपेतो बियद्दृष्टिर्बभूव ह ।
भेदस्याभिनिबेशेन त्रिदोषं गतबानयं ।
पिता बिचारयामास न नश्यति यथा तथा" ॥

तथाहि उपनिषदि आख्यायिका-उद्दालकः कश्चिदृषिस्तत्पुत्रः श्वेतकेतुः न्यायशास्त्रमधीत्य गृहमागतः पण्डितः कुलीनश्चाहमेबात एबस्तब्धः त्रिदोषेण नश्यतीति पिता ज्ञात्वा "भगबानाभिरस्पृष्टो येन दृष्टः सर्बदृगिति" श्रुतिबलेन "बिप्राणां त्रिनयो ह्येषः शमः प्रकृतमुच्यते। दमः प्रकृतदान्तत्वादेवं विद्वान् शमं ब्रजेदिति" रुद्रोपनिषदीत्यर्थानुसंधानेन च भगवद्ध्यानमुपदिशति। त्रिदोषनाशद्वारेति प्रकरणार्थः। तथाहि "सर्बान्वेदानधीत्य महामना अनूचानमानी स्तब्ध इयाय तं पितोवाच, श्वेतकेतो यन्नु सौम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्षः येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यबिज्ञातं बिज्ञातमिति" महामनाः अहमेव पण्डितः अनूचानमानी अहमेव कुलीनः स्तब्धः अनम्रः भगबदैश्वर्य्यादत्यस्फुरणादिति त्रिदोषं दूरीकर्त्तुं गबपर्बतादवतारयन् भगवदैश्वर्य्यं भगबदाधीनत्वं भगबत्प्रधानत्वमुपदेष्टुं पृच्छति "तमादेशमिति" अप्राक्षः-गुरुं पृष्टबानसि किं, तार्किकत्वात् पितरं पृच्छति कथं नु भगवः स आदेशो भबतीति हे

भगव: पित: आदेश उपदेश: कथं, नहि पटे ज्ञाते घटो ज्ञातो भवति कथं नु भगव: स आदेशो भवतीति ? "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" पिता च वदति यथेति एकेन मृत्पिण्डेन कारणतया प्रधानत्वेन मुख्यत्येन ज्ञातेन मृत्पिण्डेन मृन्मय सर्व मृत्तिकाधीनमिति ज्ञानं स्यात् राजनि दृष्टे तदधीनसेवकवत् अपृथग्व्याख्याने एक पद वैयर्थ्यं स्यात् । ननु मण्यादे: प्राधान्यात् कथं मृत्प्राधान्यं तत्राह-विकार: मण्यादिकार्य्यं नामधेयं मुख्यत्वेन प्रसिद्धि वाचारम्भणं वाचा नाम्ना आरम्भणं अज्ञानां नाममात्रेण मुख्यत्वप्रसिद्धिरिति भाव: वस्तुतस्तु मृत्तिकैव सत्यं प्रधानमित्यर्थ: । नहि चौरस्य धनप्राधान्ये धनिनि गौणत्वं, भगवति प्राधान्यं कारणत्वं चातिदिशता "सदेव सौम्येदमग्र आसीदेकमेवाद्वितयं" तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत ता आप: ऐक्षन्त बह्व्य: स्याम:" सत् सदित् इति इदं विश्वं लीनमासीदित्यर्थ: । तेज आदीनां स्रष्टृत्वेऽपि भगवत एव प्राधान्यं अत अज्ञस्त्वं स्वप्राधान्यं त्यजेति भाव: । अतएवाऽग्रेऽनुवदति अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् पुनरग्रे तेजो बन्नानां प्राधान्यं निरूप्य रूपादिश्रुतित्रयाणामिव प्राधान्यमुक्तं त्रीणि रूपाणीत्येव सत्यमिति सन्मूलं वृद्धि सौम्येमा: प्रजा: सदायतना: संप्रतिष्ठा इति । किंच नवकृत्वोऽभ्यासानन्तरं तत्सत्यं स आत्मा तत्वमसि श्वेतकेतो इति भूय एव च मा भवान् विज्ञापयत्विति" प्रश्नानन्तरं उद्दालको वदति पुरुषं साम्योतोपतापिनं ज्ञातय: पर्य्युपासते"ति उत्तरं दत्तं उपासनाश्रवणादुपासनैव तथा श्रुत्यन्तरेऽपि "आत्मा वा अरे द्रष्टव्य" इत्युपक्रम्य "ब्रह्म तं परादाद्योन्यत्रात्मनो ब्रह्मवेद क्षत्रं तं परादाद्योन्यत्रात्मनो क्षत्रं वेद सर्वं तं परादाद्यो-

ऽन्यत्रात्मनः सर्वं चेदेदमि"त्यादिना भगवत्प्राधान्यं विना ब्रह्मादिप्राधान्यवेदिनः निंदामुक्त्वा भगवत्प्राधान्यं भगवदाधीनत्वं च दृष्टान्तेनाह "स यथा दुन्दुभे र्हन्यमानस्य बाह्यांश्छब्दाच्छक्नुयात् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः" पुनश्च स यथा सर्वासामपां समुद्रमेकायनमिति दृष्टान्तीकृत्य इदं महद्भूतमनन्तमपारं विज्ञानघन इत्युपसंहृतम्। तस्माद्भगवत एव प्राधान्यं तज्ज्ञानेन ज्ञानं चेति सर्वं ज्ञेयम्। स च "एषोऽणिमसूक्ष्ममेतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्वमसीति यः सर्वेश्वरः यदीयास्तेजो वन्ह्याद्यः सर्वसमर्थः सर्वेश्वरः आत्मा तत्वमसीति" तत तस्य त्वं तदीयोऽसीत्यर्थः ॥७॥

पुन उदयास्तमयाधारत्वेनैश्वर्यं निरूपयति पृष्टः सन भूय एव भगवन्विज्ञापयत्विति तथा सौम्येति हो वाच-यथा सौम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसात् समव्यवहारमेकता रसं गमयन्ति, ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सौम्येमाः प्रजाः सत संपद्य आगम्य न विदुः सत संपद्यामह इति, त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतंगो वा दंशो वा मशको वा यद्यद्भवन्ति तदा भवन्ति, स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्वमसि श्वेतकेतो" यथा नाना वृक्षाणां रसा मधुनि तिष्ठन्ति भिन्न—तया त्रिदोष—नाशकार्यदर्शनादेवं प्रलये भगवति व्याघ्रादयः एतादृशो यो भगवां स्तस्य त्वमसि एवं नदी-समुद्रादावपि ज्ञेयम। नहि समुद्रे नदीप्रवेश ऐक्यमानयति स्त्रीत्वादन्यथालिङ्गने स्त्रीपुरुषैक्यं स्यात्। एकत्वे वृद्धि र्न स्यात् नहि गंगा—समुद्रजलयोरैक्यं द्रवत्वसाधर्म्येऽपि स्वरूपवैलक्षण्यात् उक्तं च स्कांदे "उदकं

तूदके सिक्त मिश्रमेव यथा भवेत् । न वै तदेव भवति यतो वृद्धिः प्रदृश्यत" इति एव मेव जीवोऽपि तादात्म्यं परमात्मनेति तस्मान्नानागुणवत्वेन भगवन्तमुक्त्वा तदीयत्वमुपदिश्यते नवकृत्वः । किंच श्वेतकेतूपाख्याने सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्येकः असदेवेदमग्र आसीदिति द्वितीयोपक्रमः सौम्येमास्तिस्रो देवताः इत्यपि श्रूयते अथ च तृसृणां भूम्यादिदेवतानां च पुनस्तेजसश्चोपस्थिति "मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा त्वमसि श्वेतकेतो "तत्र तत्पदार्थः कः किं सत् सदेव सौम्येदमित्युपक्रमात् । यद्वा असत् असदेवेदमग्र आसीदित्युक्तेः । अथ च तिस्रो देवता वा सौम्येमास्तिस्रो देवता इत्युक्तेः, अथ च नैकट्यात्तेजो वा एतेषामुपक्रमोपस्थिते ननु ब्रह्मणः अभेदस्य वा नन्वेवं चेत् श्रुत्यन्तरेऽपि विनिमयवाक्यानां का गतिः?, तथाहि-अहमेवेत्युपासीत तत्वमसि त्वं चाहमस्मि भगवो देवते अहं वै त्वमसि भगवद्देवते तद्योहं सो योऽसौ सोऽहमित्यादि तत्रोच्यते वास्तवेषु तदर्थेषु शब्दस्योच्चारणं वृथा उपाधिनैव सोऽहं स्यान्निरुपाधौ भवेत् स्मृतिः गौर्दातव्यात्र ब्राह्मणोऽस्तीत्युक्तेऽहमस्मीत्युच्यते तथा प्रकृतेऽपि सर्वज्ञत्वादि-प्राप्तये सोऽहमस्मीति वाचनिकोपासना श्रुतिश्च य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्वान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवतीति" "य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति स य एतमेवं विद्वानुपास्तेऽपहते पापकृत्यां लोकी भवति सर्वमायुरेति ग्जीवतीति" "य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मि" अन्यथा वास्तवाभेदे योऽहं सोऽसौ योऽसौ सोहमित्यादि पौनरुक्त्या व्यर्थं

स्यात् । नहि कुत्रापि विप्रोऽहं ब्राह्मणः ब्राह्मणोऽहं विप्र इति प्रयुज्यते प्रेक्षावद्भिः नहि वाधितार्थं वेदो वोधयति तर्हि कथं वोधयति उपासनार्थं स चोपासनायामुपास्यतत्वं विचार्य्यते यथोक्तं तथोपासना कार्य्या फलोक्तिं विना यत्रोपासना तत्र श्रीगीताद्युक्तं ज्ञेयं "इदं ज्ञानं समाश्रित्य मम साधर्म्यमागताः" "श्रीपराशरश्च "आत्मभावं नयत्येनं तद्ब्रह्मध्यायिनं मुने । विकार्य्यमात्मनः शक्त्या लोहमाकर्षको भवेदिति" । नहि लोहाकर्षयोरैक्यं "ब्रह्मविदाप्नोति परं सोऽश्नुते सर्वान् कामान् ब्रह्मणा विपश्चिता" एतमानन्दमयमात्मानमुपसंक्रम्य "इमान् लोकान् सकामान् कामरूप्यनुसंचरन् स तत्र तत्र पर्य्येति" "रसो वै सः रसं ह्येवायं लब्धानन्दी भवतीति" "तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति इति ॥

ननु दहरशाण्डिल्यादिविद्यायां सगुणब्रह्मोपासनया सफलत्वम् तत्वमस्यादि वाक्यानां तु निर्गुणविषयतया यथार्थत्वम् । अतो लक्षणयैक्यमेवेति चेत् सत्यम् नास्माकमद्वैतवादिना विवादः किंतु वाक्यार्थेन स्वं मत" चैष्लवाश्च समाधीयते । विवादे आग्रहश्चेत्तर्हि शृणु । तत्वमसि, ब्रह्माहमस्मि, रामोऽहमस्मि, गोपालोऽहमस्मि तथैव शाण्डिल्यदहरविद्यादिषु ततश्च गोपालपदेनेश्वरत्वोपस्थितिः"। तत्पदेन सर्वज्ञत्वोपस्थितिः" दहरादिविद्यासु सत्यकाम-सत्यसंकल्पाद्युपस्थिति"। ततश्च गुणस्य सर्ववाक्येषु एकरूपत्वाल्लक्षणाया श्च एकरूपत्वात् न वाक्येषु वैलक्षण्यम् कल्पयितु शक्यम् । तस्मादभेदवाक्यानामुपासनापरत्वम् सफलत्वात् । यथा ध्रुवेन सर्व। "मकेन भगवता सहाभेदोपासनया प्राणायामेन सर्वेषां प्राणनिरोधो जात"'। नाथमर्थ" कल्पितः किंतु न्यायशास्त्रि ककारादिपूर्वाचार्य्यैरयमेवार्थः" प्रकटित"

तस्माद्भक्तैस्तु दासभावनैव कर्त्तव्या नान्या। तदुक्तं ब्रह्मवैवर्त्ते-नाद्वैतवादी न विरागयुक्ता दास्ये प्रवृत्तो न परं विचिन्तयेदिति। ॥ ८ ॥

ननु ब्रह्मैक्यं श्रूयते प्रपञ्चादीनां श्रुतिपुराणेषु तथाहि-इदं हि विश्वं भगवानिवेतरो यतो जगत् स्थाननिरोधसंभवाः। तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं भवतः प्रदर्शितं॥ अमुनी भगवद्रूपे मया ते ह्यनुवर्णिते। उभे अपि न गृह्णन्ति मायासृष्टे विपश्चितः"। "सर्वं खल्विदं ब्रह्म कं ब्रह्म खं ब्रह्म"। नृसिंहतापिन्यां वा "यो वै नृसिंहो देवो भगवान् यश्च ब्रह्मा तस्मै नमो नम" इत्यादिना सर्वात्मकत्वं, यच्च सामानाधिकरण्यं श्रुतौ "यो वै श्रीरामचन्द्रः स भगवान् तस्मै नमो नमः"। "यो वै जीवात्माभूः तद्-ब्रह्माहमितीति" ब्रह्मविन्दूपनिषदि" "गोपालोऽहमिति भावयेदिति" तापिन्यां अन्यानि च तत्त्वमस्यादिवाक्यानि बोध्यंते न भेद इति चेन्न। भेदस्य सर्व—प्रमाणसिद्धत्वात् स्मर्य्यते चेति तन्यायाच्च। शुको वैयासकि रादित्यमण्डलं प्राप्य स्वमहिमाख्यापनं कृत्वा सर्वात्मभूतोऽभवदिति स्मर्यत इति भाष्यकारेणोक्तं फलाध्याये। अतो भेद एव। सर्वत्र श्रुतीनामबाधितप्रामाण्यात् वेदराशे र्विषयबाधो वा द्वित्राणां वाक्यानां वा संकोचः लाघवात्संकोचः एव श्रेयान् तथाहि सर्वं खल्वित्यादेस्तदधीनता मात्रं संकोचः वेदराशेस्तु प्रत्यक्षादयः सहकारिणोऽभेदे तु बाधकाः अतो भेद एव। अन्यथा विषयरूपत्वाद्ब्रह्मणः विहितनिषिद्धविषयास्वादकस्य निन्दास्तुती न स्यातां प्रत्युतसर्वविषयास्वादकोऽनीव विषयस्वादकोऽतीव ब्रह्मवित्स्याद्विरक्तस्तु अहमाल्पज्ञानवान् स्यात् किंच यदि सर्वप्रमाणबाधितेऽर्थे वेदस्य संकोचो न स्यात्तर्हि

कोऽप्यय ं न सिद्धयेत् बिरुद्धत्वात् तथाहि कुत्रापि ब्रह्मात्मकत्वं कुत्रापि सूर्य्याग्निमन:प्राणात्मकं तत्र विरुद्धत्वेन स्वतन्त्र-मेवायाति। अन्यच्च भस्मान्तकत्वे सर्वस्मिन् श्रूयमाणे भस्मा-न्तकमेव किं न स्यात्तथाहि अथर्वशिरोपनिषदि- भस्मजलमिति भस्म स्थलमिति भस्म स वेह वा इदं भस्म इति। तथा श्रीभाग-वते- येन जात: स एव स इति पंच पंचाशताभवमिति च तथा प्रकृतेपि। तस्माच्चिदचिद्रात्मकस्य प्रप ंचस्य नियम्यतया कार्यतया तथा तदधीनतया तद्विभूतितया तत् क्रीड़ोपकरणतया प्रतीति-विषयत्वेनापृथग् स्थिततयान्तर्यामितया साक्षितया ब्रह्मतोक्ति र्नतु मिथ्यात्वेनेति ज्ञेयं। यत्र तत्वमस्यादिवाक्यानि सामाना-धिकरण्यं वदन्ति तत्र शरीराभिप्रायेण॥

यत्कार्यं येन जातं हि तत्कार्य्यं तत्प्रचक्षते ।
ब्राह्मणाज्जायतेऽपत्यं ब्राह्मणत्वेन चोच्यते ।
प्रतियोग्यनुयोगीं च संम्बन्धेन परस्परम् ।
अन्योन्य नामवाची स्यादित्येषा परमार्थता ।
यत्पोष्यं यदधीनं यत् तत्तदेवेति वैदिके ।
यथा कार्य्यं कुण्डलादि सुवर्णमिति ।

ब्राह्मणापत्यं ब्राह्मण एव ब्राह्मणस्य शरीरं ब्राह्मणस्यात्मादु:खी-त्यादय्येकसम्बन्धेन ब्राह्मणादिपदवाच्यतोभयत्र यथा तथा ब्रह्म-जीवविश्वेषां यद्यपि जीवेशयो: कार्य्यकारणभावो नास्ति तथापि जीवस्येश्वराधीनत्वादीशत्वं। यदधीनं यद्वस्तु तत्तन्नाम्ना व्यव-ह्रियते उक्त ं च स्कान्दे"यदधीनो गुणोऽन्यस्य तद्गुणो सोऽभि-धीयते। तथा जीव: परात्मेति तथा राजा जयीत्यपि"। तस्मा-दीश्वरादुत्पन्नत्वादीश्वराधीनत्वादीश्वराक्रीडोपकरणत्वादीश्वरश-रीरं चिदचिद्वस्तु। अत: समानाधिकरण्यं तत्वमस्यादिवाक्यं जीवस्य शरीरत्वमीश्वरस्यात्मत्वमिति । न च श्वेतकेत्वाख्याने

तस्य त्वमिति व्याख्यानेन विरोधः काणो ब्राह्मणः खंजो ब्राह्मण इति वत् वस्तुतस्तु सर्वत्रैव परिपाटी-अभेदोक्तिस्त्रिधा दृष्टा ज्ञाने भक्तौ च कर्म्मणि । अत्राधिकारी स भवेद् यो,फलेच्छुश्च भेदवान् । यथा भक्तौ कर्मणि चाभेदोक्तिर्निःश्रेयसोत्पादिका तथा ज्ञाने ऽपि तथाहि भक्तौ । "कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः" । अत्र कायित्वा कृष्णार्भभावनामित्यादि बहुशः लीलाद्यभिनयो हरेरित्यादौ बालकं श्रीकृष्णं वेषयित्वा तस्याभिमानो भवति कृष्णोऽहमिति रसादौ, नहि तस्याः कृष्णत्वं भवत्यपि तु अभ्युदयं, अन्यथा पूतनायन्त्याः वत्सायन्ती बकायतीमित्यादौ तासामसुरत्वं च दोषत्वं च स्यात । तथा कर्म्मणि पितृपितामहप्रपितामहा इत्युक्ते ब्राह्मणाः पित्राद्यभेदं मत्वा वदन्ति स्वागतमिति । तथा विष्णुस्थानस्थोपि ब्रह्मणोपि वदन्ति तथा "नारायणमयं धीराः पश्यन्ति परमार्थिनः । जगद्धनमयं लुब्धाः कामुकाः कामिनीमयमि"त्यादौ सर्वत्र भेद एव नाभेदः । तथा च सूत्रं भेदव्यपदेशाच्च भेदेनानन्दनादीश्वराद्भिन्नत्वेन व्यपदेशात् । रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीति श्रुतेः । नहि लब्ध एव लब्धव्यो भवति । तस्माद्भेद एव । तथा च श्रुतिः - अनन्विष्टोऽन्वेष्टव्यः अलब्धा लब्धव्योऽश्रुतः श्रोतव्यः अमतो मंतव्यः अविज्ञातो विज्ञातव्यः इत्यादौ भेदव्यपदेशः । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति, कल्पितभेदव्याख्याने सर्व प्रमाणबाधः स्यात् तस्माज्जीवो भिन्नः । तथा लोकेऽपि कार्य्यनिर्वाहार्थं राजा वदति अहमेवायं सेवक इति । सेवकोपि वदत्यस्मिन् कार्येऽहमेव राजेति । अन्यथा दंड्यः स्यात् तथा च श्रुतिः "यः पृथिवीमन्तरो यमयति स त आत्मान्तर्याम्यमृतः य आत्मनि तिष्ठन्नात्मनोऽन्तरा यमात्मा न वेद यस्याऽत्मा शरीरं य आत्मानमन्तरो यमयति स त आत्मान्तर्याम्यमृतः यः पृथिवीमन्तरं संचरन्नि"त्यारभ्य यस्य मृत्युः शरीरं यं मृत्यु र्न वेद एष

सर्वभूतान्तरात्माऽपगतपाप्मा दिव्यो देव एको नारायण:" "अन्यच्च यस्य पृथिवी शरीरं यस्यापः शरीरं यस्य तेजः शरीरं यस्य वायुः शरीरं यस्याकाशः शरीरं यस्याक्षरः शरीरं" । श्रुत्यन्तरे-"तानि सर्वाणि तद्वपुः तत्सर्वं वै हरेस्तनुः" । शौनकं प्रति - "यदम्बुवैष्णवः-कायः ततो विप्र वसुन्धरा" । तस्मात्तत्वमसीत्यादौ स ईश्वरस्त्वं ईश्वरशरीरत्वात्त्वमर्थस्य यथा ब्राह्मणोऽयं देहः न च ब्राह्मणत्वं देह एवेति वाच्यं ब्राह्मणस्यायं देह इति प्रयोगदर्शनात् । देहात्मसम्बन्धविशेष एव ब्राह्मणशब्दप्रवृत्तिनिमित्तमन्यथा भ्रष्टेऽपि तत्वं स्यात् ॥६॥

ननु शास्त्रेणाभेदश्रवणात्कथमीश्वरविश्वयो विभागः तथा च श्रुतिः यदा ह्यवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवति, एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किंचन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति । अथात आदेशो नेति नेतीत्यादीति चेन्न । वास्तवे भेदेऽपि जीवब्रह्मणोः चेतनत्वेनाभेदः, ब्रह्मविश्वयोः प्रमेयत्वेनाभेदप्रतिपादनात् । यद्वा एतैरेववाक्यै र्भेदप्रतिपादनात् यदा कालः एष लोकः एतस्मिन् ईश्वरे उत् अरमीषत् अन्तरं भेदः कुरुते कृतिः भयं च एकमेव सजातीयं विना अद्वितीयं विजातीयं विना ब्रह्म अल्पं बिना न इति प्राप्ति विना इहाधिकरणान्तरं विना नाना अनेक प्राप्ति विना न निर्वहतीति भेदप्रतिपादनाच्च ॥१०॥

तर्हि वाक्यार्थः कथं, शृणु कारणत्वं प्रधानत्वं वैलक्षण्यमपीश्वरे सजातीये बिजातीये तन्निषेधान्निरूप्यते अनेकेषां कारणत्वे प्रधानत्वेपि च कारणत्वप्रधानत्वयो र्भगवत्येवावधित्वं । कथं सजातीये कालादौ विजातीये कर्मजीवादौ कारणत्वप्रधानत्वनिषेधात परमकारणत्वं परमप्रधानत्वं परमवैलक्षण्यं प्रतिपाद्यते । कारणानां प्रधानानां चोपस्थितत्वात् तथा च मण्डूकोपनिषदि-सर्वं जनयति प्राणश्चेतांश्रून् पुरुषः पृथक् । कालात् प्रसूतिं भूतानां मन्यंते

कालचिन्तका इति कौठकचश्रुतौ च प्राणो बाच सर्वेभ्यो भूयान् न प्राणाद्भूयान् प्राणो ह्येव भूयान् तस्माद्रूपान्नामेत्यादिना काल-प्राण-चेतो-जीवानां कारणत्वमुपस्थितं मनस्येव सर्वं प्रतिष्ठितं प्राण एव धर्म एवेति तद्धैक आहुरसदेवेदमग्र आसीदिति मनः प्राण धर्मासतां च तत्सर्वं निषिध्यते। नेह नानास्ति किंचन एक-मेवाद्वितीयं ब्रह्मेति। बृहदारण्यके च ते देवा अब्रुवन् एतावद्वा इदं सर्वं यदन्नं कामः संकल्पः बिचिकित्सा श्रद्धा धृतिरधृतिर्ह्रीर्धी-रित्येतत्सर्वमन एव मन एवापि ता बायुर्वै गौतम सूत्रं वायुना वै गौतमसूत्रेणायं लोकः परश्च लोकः सर्वाणि भूतानि संदधानि छांदोग्ये च प्राणो वावज्येष्ठश्च श्रेष्ठश्च इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तंयन्त्याकाशो ह्येवैभ्यो ज्यायान् इत्यादीनोपस्थितं प्रधानत्वं कारणत्वमधिकरणत्वं बाह्यादिषु निषेधयति अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्य-त्यदमस्त्य नाम धेय इति सत्यस्यथ सत्यमिति प्राणो वै सत्यं तेषा-मेष सत्यः ततश्चायमर्थः एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेति अद्वितीयपदं कारणाधिष्ठानविचित्रशक्तिमतामन्येषां निषेधः एकं मुख्यं सजातीयभेदराहित्यमिति तु व्याख्याने लक्षणा-पत्तेः। एक शब्द एक संख्यायुक्ते मुख्ये च रूढत्वात्। श्रूयते बहूनां कारणत्वं प्रधानत्वमधिकरणत्वं च कारणानां कारणं अधि-ष्ठानानामधिष्ठानं इह कारणादौ नाना न अन्यथा एकपदमिहपदं च व्यर्थ्यं स्यात्। अन्तर्यामित्वकर्तृत्वाधिष्ठातृत्वानां निषेधः तथोक्तं नारदेन पर्वतऋषिं प्रति योगभास्करब्रह्मविद्यायां-

"एकः सकलमुख्यत्वादानन्दाद्वै ततोऽद्वयः।
आत्मा ज्ञानमयत्वाच्च व्यापकस्तु स्वशक्तितः।
आकाशदेहो नीलत्वाद्व्यापकत्वादनावृतः।
अरूपो निर्गुणो हीनः प्रकृतेर्गुणरूपयोः।

सूर्य्यादेरप्रकाशत्वात् स्वयं ज्योतिरुदाहृतः ।
त्रिकालावस्थितेः सत्यो ह्यनन्तः कालरूपतः ।
योगमायानियन्तृत्वात् स्थूलसूक्ष्मादिरूपवान् ।
भगवान् भगरूपत्वादेषः सर्वेश्वरेश्वरः ।
पुरुषोऽमितमायत्वादद्वयत्वात्समः सुहृत् ।
अक्रियोऽयमनाशत्तथा ज्ञानत्वाच्च निरञ्जनः ।
बिहीनः प्राकृतैर्दोषैः शास्त्रीयैरित्यगोचरः ।
अवतारसहस्राणि श्रीकृष्णस्य महात्मनः ।
तृतीयांशावतारो ऽभूदादिनारायणाभिधः ।
यस्यासन् रोमकूपेषु तेजसाच्छादितेष्विह ।
अथैकसप्तति तमे नृसिंहो भक्तिरक्षणे ।
द्विसप्ततितमे रामो रावणारिर्महायशाः ।
षट् सप्ततितमे रामो बसुदेबसुतो वलः ।
कलावतारो जीवांशः कृष्णस्यासीन्महात्मनः ।
अंशावतारौ कृष्णस्य बामनश्च त्रिबिक्रमः ।
अबताराष्टोत्तरशतमिदं तुभ्यं मयेरितमिति" ॥११॥

केचित्तु ऐक्यप्रतिपादितेषु बाक्येषु अन्तयाम्यैकमेबार्थं बर्णयन्ति यथा प्रथमे-"तमिममजमहं शरीरभाजां हृदि धिष्ठितमात्मकल्पितानां । प्रतिदिशमिव नेकधार्कमेकं समधिगतोऽस्मि बिधूतभेदमोहः"। सप्तमे"तेष्वेब भगवान् राजन् तारतम्येन बर्त्तते" इति । "जलेऽर्कबत् आत्मानीश्वर इति"। तस्मान्नित्यकल्याणगुणवान् सर्वेश्वरः सर्बान्तर्यामी भक्तवत्सलः स्वतन्त्रः नित्यानन्दबिग्रहवान् अनेकब्रह्माण्डक्रीड़नकः सिद्धः ॥१२॥

आत्मैक्ये निंदा च मोक्षधर्म्मे स्यूमरश्मिकपिलसंवादे-स्यूमरश्मिं प्रति कपिलबाक्यं तत्वजिज्ञासा निर्णये-तत्र पूर्ववृत्तं लिख्यते । यद्यपि बिरुद्धार्थप्रतिपादकत्वेन निन्दैवायाति कुत्रचित्

कर्म निन्दा कुत्रचित्प्रशंसा कुत्रचिदात्म्यैक्यं सर्वत्र नानात्वं कुत्रचित्तुच्छत्वं कुत्रचिद्भावरूपत्वं कुत्रचित् शून्यत्वं सर्वत्रानन्दत्वं इत्यादिना। तथापि तत्तदधिकारिभेदेन सर्वं प्रमाणमिति कपिलाचार्येण निर्णीतम्। तथाहि कपिल उवाच "नाहं वेदान् विनिन्दामि न विवक्ष्यामि कर्हिचित्। पृथगाश्रमिणां कर्माण्येकार्थानीति नः श्रुतम्"। एकः मुख्य अर्थः पुरुषार्थो येषां तानि। नारभेतेति चान्यत्र नैष्ठिकी श्रूयते श्रुति. "अनारम्भेऽव्यदोषः स्यादारम्भे दोष उत्तम" इति। तत्र कस्यचिद्धर्म्म कस्यचिदर्थादिरित्यादि ज्ञेयम्। ततश्च शास्त्रार्थनिर्द्धारे पुरुषार्थनिर्द्धारे च पुनः पृच्छति स्यूमरश्मि उवाच-स्यूमरश्मिरहं ब्रह्मन् जिज्ञासार्थमिहागतः। श्रेयस्कामः प्रत्युवाच मार्गाणां तु विवक्षया। इमं तु संशयं घोरं भगवान् प्रब्रवीतु मे। कपिलउवाच—यद्यदा चरते शास्त्रमथ सर्वप्रवृत्तिषु। यस्य यत्र ह्यनुष्ठानं तत्र तत्र निरामयम्। ज्ञानं प्लावयते सर्वं यो ज्ञानं ह्यनुवर्त्तते। ज्ञानादपेत्यया वृत्तिः सा विनाशयति प्रजाः। भवंतो ज्ञानिनो व्यक्तं सर्वतश्च निरामयाः॥

ऐकात्म्यं नाम कश्चिद्धि कदाचिदुपपद्यते।<br>
शास्त्रं ह्यबुध्वा तत्वेन केचिद्वादबलाः जनाः।<br>
कामद्वेषाभिभूतत्वादहंकारवशं गताः।<br>
याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः।<br>
ब्राह्मणास्ते निरालम्बाः दम्भमोहवशानुगाः।<br>
नैगुण्यमेव पश्यन्ति न गुणाननुयुज्यंते।<br>
तेषां तमः शरीराणां तम एव परायणमिति"।

तथा ब्रह्मवैवर्त्ते च-नाद्वैतवादी न विरागयुक्तो दास्ये प्रवृत्तो न परं विचिन्तयेदिति। "यतो वाचो निवर्त्तन्ते" "अकर्त्तायमात्मे"त्यादिवाक्यानां गुणानन्त्याद्वाचो निवृत्तिः अवैष्णवदत्ताप्युभयोरभोक्तृत्वादभोक्ता कर्मे त्याद्यर्थो ज्ञेयः। तदुक्तं वासुदेवाध्यात्म्ये-

"अप्रसिद्धेस्तद्गुणानामनामासौ प्रकीर्त्तितः। अप्राकृतत्वाद्रूपस्याप्यरूपोऽसावुदीर्यते" । वस्तुतस्तु अकर्त्तृत्वादावकर्तृपदवाच्यस्य ये निर्लेपा विधर्मास्ते ईश्वरे संतीत्युच्यते । अकर्त्तृत्वपदेन यथा शून्यादिपदेन तत्सादृश्यं तथा कर्त्तृसादृश्यं निर्लेपत्वादि तथाहि उपनिषदि-"एष ह्येव शून्यः एष ह्येव तुच्छः एष ह्येवाभावः एष ह्येवाव्यक्तोऽदृश्योऽचिन्त्यो निर्गुणश्चेति । अन्यथा शून्यत्वादिकमेव स्यात्। नन्वेवं चेत् भक्तिरस्योपासनात् फलवत्वात् । न भक्तेः सुखरूपत्वेन फलाभावात्। न च सुखे जाते दुःखाभाव एव फलमिति वाच्यं । पादे सुखं शिरसि मे वेदनेति युगपदनुभवात्। ननु श्रूयते भक्तेः फलं पुत्रादि न कर्त्तुरेवावैदग्ध्यात्। नहि मणेर्भर्जितचनकाः फलं तदुक्तं ब्रह्मवैवर्त्ते-हरेरूपासना चात्र सदैव सुखरूपिणी । न च साधनरूपा सा सिद्धिरेवात्र सा यतः इति ॥१३॥

ननु कथं भगवच्छरीरसिद्धिः प्रमाणाभावात्। नह्यदृष्टं विना शरीरसिद्धिः प्रयोजनाभावात् भोगायतनं हि शरीरमिति चेन्न सर्वप्रमाणगम्यत्वात् वेदानुयायिभिर्मानैः प्रत्यक्षादिभिरुच्यते। "शरीरं सद्गुणैर्व्याप्तं नित्यानन्दात्मकं हरेः"। वैकुंठे पार्षदलक्ष्मीनां भूवैकुण्ठे हनुमदुद्धवप्रल्हादादीनां श्रुतिस्मृतिपुराणागमेषु सर्वेन्द्रियास्वाद्यत्वेन श्रूयमाणत्वात् प्रत्यक्षेण शरीरसिद्धिः । योग्यानुपलब्धितत्वादिति चेन्न सहकारिविरहात् । उपासनोपासकानां प्रत्यक्षत्वात् अन्यथेन्द्रादिसिद्धिरपि न स्यात् अनुमानमपि । भगवान् शरीरी कर्त्तृत्वाद्देवदत्तवत् न चादृष्टाभावादशरीरी मुक्तवदिति प्रतिरोधादसिद्धिरिति वाच्यं । आगमादिसहकारित्वेनाधिकबलत्वात् त्वयापि जीवादृष्टादिनोपदेशार्थं स्वीकृतत्वाच्च । अन्यथा ज्ञानेच्छाप्रयत्नादीनामप्यसिद्धिः स्याददृष्टाभावात् न च कर्त्तृत्वान्यथानुपपत्त्या तत्सिद्धिः । शरीरस्य

तत्राप्रयोजकत्वादिति वाच्यं पटे पृथिव्यादिवद् ज्ञानाधारतया ईश्वरस्य कारणत्वं न स्यादन्यथा सिद्धत्वाभावात् । किं च चेष्टाश्रयत्वेन कुलालादीनां कर्त्तृत्वं तद्वदीश्वरेऽपि स्वीकरणीयं ज्ञानाश्रयत्वेन कर्त्तृत्वेन चेष्टादीनामकारणत्वं स्यात् । न चेश्वरत्वादेव चेष्टानपेक्षत्वं ज्ञानादावपि सुवचत्वात् न च चेष्टाया व्यापारत्वं तस्यापि कारणत्वात् । किं च कर्त्तृत्वशरीरित्वयोः समव्याप्तत्वादेवं सिद्धेयदुभयं पर्यवस्यति न च मध्यमपरिमाणत्वात् सावयवत्वादनित्यं स्यात् प्रयोजनाभावादनुपलब्धिवाधितत्वान्नसिद्धिरिति वाच्यं । स्वस्य जीवानां च प्रयोजनस्य विद्यमानत्वात् वेदपुराणेषु नाभिकमलाद्ब्रह्माण्डोत्थशरीरस्य श्रूयमाणत्वाच्च । शरीरसिद्धौ सावयवत्वादिकं विचारयिष्यामः । वस्तुतस्तु अलौकिकेऽर्थे नानुमानादीनां प्रामाण्यं किंतु श्रुतेः । तदनुकूलतादीनां तु सहायमात्रं तदुक्तं कौर्म्मे-

"श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् ।
निश्चयात्साधयेदर्थं प्रमाणान्तरमेव च ।
श्रुतिस्मृतिसहायं तत्प्रमाणांतरमुत्तमम् ।
प्रमाणपदवीं गच्छेन्नात्र कार्य्यविचारणा ।
पूर्वोत्तरविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ।
इत्याद्यमूहनं तर्कं शुष्कतर्कं तु वर्जयेदिति" ।

यद्यपि तथावितर्केणापि सिध्यत्येवेति ज्ञापयितुं तर्कोपन्यास इति ॥१४॥

नन्वशरीरकर्त्तृकनिषेधतः कर्त्तृमात्रनिषेधः श्रेष्ठः किमिति न स्वीक्रियते कारणं विना कार्य्योद्बलवती प्रसक्तिरिति कर्तृस्वीकारः तर्हि विचार्यतां क्षित्यादिकं सकर्त्तृकं कार्य्यत्वाद् घटवदिति कुविंदद्दष्टान्तेनेश्वरसिद्धिः तत्र कीदृशीव्याप्तिः घटादौ कृतिसाध्यता हस्तादिव्यापारद्वारैव गृन्हीता नतु साक्षात् । न चाश-

रीरस्य संभवति। अन्यादृशी च कृतिसाध्यता न दृष्टा ततश्च कृतिसाध्यत्वे शरीरव्यापारजन्यत्वं प्रयोजकं तत ईश्वरः शरीरी कर्त्तृत्वाद्देवदत्तवदिति सिद्धं ॥१५॥

न च जन्यत्वं हस्तादिव्यापारद्वारकर्त्तृककार्य्यावच्छेदकं घटत्वादिकं वा आद्येऽङ्कुरादौ व्यभिचारो द्वितीये कुलालेन सिद्धसाधनमिति न तत्सिद्धिरिति वाच्यं। जन्यत्वमात्रस्य विवक्षितत्वात् । न च क्षितौ व्यभिचारस्तत्रापीन्द्रियव्यापारस्य विद्यमानत्वात्। तत्र श्रुतिः "तदैक्षत तत्तेजोऽसृजत" तथा तृतीये-

यमाहुराद्यं पुरुषं सहस्रांघ्र्युरुबाहुकं ।
यत्र विश्वे इमे लोकाः सविकाशं समासत ।

तस्यार्थसूक्ष्माभिनिविष्टदृष्टे
रन्तर्गतोऽर्थो रजसा तनी यान् ।
गुणेन कालानुगतेन विद्धः
सूष्येंस्तदा भिद्यतनाभिदेशादिति"

किंच (किन्तु) यत्र विशेषयोः कार्य्यकारणभावस्तत्र बाधकं विना सामान्ययोरपि तथा नियमात् ॥१५॥

न च यदि शरीरी स्यात् भोगवान् स्यादित्यादि बाधकान्न तत् सिद्धिरिति वाच्यं व्याप्तिग्रहकाले भोगादेरनुपस्थितत्वात नच स्थित्यादिकर्त्तृत्वेन कर्त्तृत्वमात्रमुपस्थितं न तथात्वमिति वाच्यं, ज्ञानशरीरवत्त्वेनैव कर्त्तृत्वं कर्त्तृत्वात्तथा व्याप्तेश्च लाघवादनुकूलचेष्टावत्त्वं चाकर्त्तृत्वं। उपादानापरोक्षज्ञानचिकीर्षाकृतिमत्त्वेऽनिष्टविषयकज्ञानं प्रतिकर्त्तृत्वं न स्यात्। उपस्थितौ वा भागवती श्रुतिरेव प्रतिभट्टकरणीया "अन्यत्राधर्माद्न्यत्र धर्मात् एष एव परो ह्यानन्दः, रसो वै स" इति अन्यथा शरीरेऽनिन्द्रिये निर्व्यापारे सृष्ट्यादीनामेककालता स्यात्। सर्वनिरपेक्षत्वात् दृष्ट सामग्रीअपेक्षत्वेपि शरीरापेक्षापि स्यात् ईश्वर-

स्य विद्यमानत्वात् न च पूर्ववर्तित्वमेव प्रयोजकं निर्व्यापारस्यापि तत्वं स्यात् । किं च शरीरव्यापारद्वारैव प्रयत्नस्य कारणत्वं न तु स्वतः तथा दर्शनात् ।१६॥

ननु कार्यं सकर्तृकमेव, कर्त्ता शरीर्येव, ज्ञानमनित्यमेव, शरीरमदृष्टजन्यमेवेति विरोधान्न तत्सिद्धिरिति चेत् न । विरोधस्यानुपस्थितत्वात् न हि व्याप्तिग्रहकाले नित्यत्वजन्यत्वयोरुपस्थितिः । सिद्धे कर्त्तृत्वे पक्षधर्मताबलान्नित्यत्वं सेत्स्यति ॥१७॥

ननु भवतु वा तथात्वं शरीरं तु न सिध्यति कर्त्तृत्वेन शरीरानुमाने दृष्टवत्वमुपाधिरिति चेन्न उक्तोपाधेरीश्वरेऽपि विद्यमानत्वात् । तर्हि जीवविशेष एव क्षित्यादिकर्त्तेत्यागतं न अनवबोधात् । नहि माया भगवति अदृष्टैव तत्र मुच्यतेऽपि तु जीवे जीवादृष्टेन कर्त्तृत्ववच्छरीरसिद्धेः अन्यथा निरपेक्षत्वात् स्वतन्त्रत्वाददृष्टाभावात् कर्त्तृत्वं न स्यात् । तर्हि शरीरित्वे भोगः न यथा कर्त्तृत्वेपि निर्लेपता तथा शरीरित्वेऽपि तुल्यं । वस्तुतस्तु पक्षधर्मताबलान्नित्यं शरीरं सिध्येत् शरीरमनित्यमेवेतिव्याप्तिः प्रत्यक्षेण न विरुध्यते । अस्मदादिशरीरविषयत्वेन भिन्नविषयत्वादिति एकविषयविरोधिज्ञानस्यैव प्रतिबंधकत्वात् । यथ पृथिवी अनित्यैवेति व्याप्तिं निरस्य परमाणुरूपा नित्या तथा जीवशरीरमनित्यमीशशरीरं नित्यमिति । ज्ञाननित्यत्वसाधने गंगेशेनाप्युक्तं वयं तु ब्रूमः पक्षधर्मताबलान्नित्यं ज्ञानं सिद्ध्येत् बुद्धिरनित्येति व्याप्तिः प्रत्यक्षेण विरुद्ध्यते । अस्मदादिबुद्धिमात्रविषयत्वेन भिन्नविषयत्वादिति । न च शरीरत्वं नित्यव्यावृत्तमेवावगमतः कथं नित्यवृत्तित्वमितिवाच्यं उभयसिद्धानित्यावृत्तित्वावगमेऽतिरिक्ते नित्यवृत्तित्वावगतौ विरोधाभावात् अतिरिक्तकथने प्रमाणाभाव इत्युक्ते श्रुतिस्मृतिपुराणागमात् प्रमाणं वक्ष्यामः, अनुकूलतर्कोऽपि, यदि क्षित्यादिकं शरीराजन्यं

स्यादकर्तृक स्यादात्मवदिति देवदत्तादिना सिद्धसाधनमिति चेन्न कर्त्तृत्वावच्छिन्नस्य निषेधापादनात् शरीरमात्रे विप्रतिपत्तिर्नत्वीश्वरे। किंच वराहमत्स्यनृसिंहानां ब्रह्म-सत्यव्रत-प्रल्हादाद्यानुग्रहार्थं शरीरं त्वयापि स्वीकरणमेव, पुराणप्रमाण्यात, नित्यत्वमात्रे परविप्रतिपत्तिः। सापि तत्तन्मन्त्राणामनादिसिद्धत्वात्तत्तदुपासकानां च वेदागमादिषु नित्यत्वश्रवणान्निवर्तिष्यते। तस्माच्छरीरी नित्यकल्याणगुणवानीश्वरः सिद्धः ॥१८॥

इदानीं तर्काणां स्वतोऽप्रामाण्यादनुग्राहकत्वेन प्रामाण्यं ते श्रुतिस्मृतिपुराणागमा उच्यन्ते। तत्र यच्छरीरं तददृष्टजन्यं सप्रयोजनं पांचभौतिकमित्यादि दोषास्ते न संभवन्ति "भौतिके दृष्टदोषा ये न भवन्ति हरेस्तनौ। जीवात्मनो यथा भेदस्तथा तद्देहगेहयोः"। यथा जीवेशयोर्वैलक्षण्येण भेदस्तथा देहस्थानादिषु सर्वांशेन वैलक्षण्यं ज्ञेयम्। ननु "उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना। कल्पितस्य शरीरस्य तस्य सेनादिकल्पना" इति रामोपनिषदि अतः पांचभौतिकमिति चेन्न वाक्यार्थानवोधात्। तथाहि ननु ब्रह्मणः पूर्णस्य रूपकल्पना शरीरकल्पना किमर्थं तत्रोत्तरं उपासकानां कार्य्यार्थं—न तु उपासकस्य कार्य्यमन्तर्यामितया न भवति। तत्राह कल्पितस्याविःकृतस्य शरीरस्य सेनादि सेना गजतुरगाः आदिशब्देन पार्षदा तत् कल्पते इति कल्पना, क्लृप्त सामर्थ्य समर्था, युक्तेत्यर्थः। मिथ्यात्वे वेदपुराणागमबाधः स्याद्बौद्धमतप्रवेशश्च। तथोक्तं प्रथमपादे भास्करभाष्यकारेण किं मायामयं रूपं नेति ब्रूमः पारमार्थिकमेवैतत् इति। तृतीये निंदा च-तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानां, तस्मै नमो भगवते ऽनुविधेम तुभ्यं योऽनादृतो नरकभाग्भिरसत्प्रसंगैरिति। चतुर्थे-क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजन्ति सिद्धये। भूतेन्द्रियान्तःकरणोपलक्षितं-

वेदे च तन्त्रे च त एव कोविदाः, क्रियाकलापैः पूजाप्रकारै। तदुक्तं भारते-"न भूतसंघसंस्थानो देहोऽस्य परमात्मनः"। बृहद्वैष्णवे"यो वेत्ति भौतिकं देहं कृष्णस्य परमात्मनः। स सर्व्वस्माद्बहिः कार्य्यः श्रौतस्मार्त्त विधानतः। मुखं तस्यावलोक्यापि सचैलं स्नानमाचरेत्"। धरणीशेषसंवादे च-"नन्दव्रजजनानंदी सच्चिदानन्दविग्रहः"। उपनिषदि-"तमेतं गोविन्दं सच्चिदानन्दविग्रहमिति"। स्वायंभुवागमे पंचाशीतिपटले-"तत्र प्रेमभराक्रान्तं किशोरं पीतवाससं"। एतज्जातीयैरेववाक्यैरानन्दविग्रहः स्वीक्रीयते। अन्यथा अदृष्टविशेषोपग्रहीतप्रवर्त्त कर्मीनादिशरीरकल्पने तज्जातीयवाक्यानां व्याकोपः स्यात्। महावराहे-"सर्वे नित्याः शाश्वताश्च देहास्तस्य परात्मनः। हानोपदानरहिताः नैव प्रकृतिजाः क्वचित्। परमानन्दसंदोहाः ज्ञानमात्राश्च सर्वतः" तथा मण्डूकोपनिषदि-"प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतो मुख" इति। "सर्वतः पाणिपादं तत्सर्वतोक्षिशिरो मुखं। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति"। ॥१६॥

न च तत्तत्कार्य्यदर्शनात्तत्तद्वत्त्वमुपचर्य्यते। ज्ञानात्मकत्वादिति वाच्यं श्रुत्यंतरविरोधेन लक्षणायां प्रमाणाभावात्। "चतुर्भुजं महावीरं पूरकेन विचिन्तयेदिति" ध्यानबिन्दूपनिषदि। स्मृतिश्च "निर्दोषपूर्णगुणविग्रह आत्मतंत्रो निश्चेतनात्मकशरीरगुणैश्च हीनः। आनंदमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविवर्जितात्मेति"। मार्कण्डेये चतुर्थाध्याये-"दूरस्था चान्तिकस्था च विज्ञेया सगुणान्विता। अस्त्येव सा सदा शुद्धा सुप्रतिष्ठैकरूपिणी" ॥२०॥

ननु शरीरपदं लोकपदवदात्मपर्याय एवातो न विग्रहविग्रहिभावः शरीरेन्द्रियराहित्येनैव श्रुतौ श्रूयमाणत्वादिति चेत्। शरीरेन्द्रियवर्णादिविभागेनैव श्रूयमाणत्वात् तथाहि-"अतसीपुष्प-

संकाशं नाभिस्थाने प्रतिष्ठितं । चतुर्भुजं महावीरमिति" विदूपनिषदि, "दुर्दर्शमतिगम्भीरमजं श्याममविशारदमि"त्यलातोपनिषदि, "पद्मकोशप्रतीकाशमिति" महोपनिषदि, "प्रकृत्या सहितः श्यामः पीतवासा जटाधर इति" रामतापिन्यां, "द्विभुजो रघुनन्दन" इति च । श्रुत्यन्तरे "तस्य परमस्य नारायणस्य च चत्वारि रूपाणि, शुक्लं रक्तं रौक्मं कृष्णमिति," । भागवते "शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गत" इति, "भूर्लोकः पादयोस्तस्य भुवो लोकस्तु जानुनोः । स्वर्लोकः कटिदेश" इति नादविन्दूपनिषदि, "चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायते"त्यादिबहुशः । कौर्म्ये-"अस्थूलश्चानणुश्चैव स्थूलोऽणुश्चैव सर्वतः । अवर्णः सर्वतः प्रोक्तः श्यामो रक्तांतलोचन" इत्यादि । "ऐश्वर्य्ययोगाद्भगवान् विरुद्धार्थोऽभिधीयते । तथापि दोषाः परमे नैवाहार्य्याः कथंचन । गुणाविरुद्धा अपि तु नैवाहार्य्याः कथञ्चन" "सस्मितं भावयेन्मुख"मित्यादि श्रीभागवते बहुशः । "ऋतं सत्यं परं ब्रह्म पुरुषं नृकेशरिविग्रहं कृष्णपिङ्गलमिति" तापिन्यां, "जरामरणनिर्मुक्ताः सर्वधर्म्माः स्वभावत" इत्यलातोपनिषदि । न ह्यात्मनि जरादयोऽपि तु देहे । न तु प्रयोजनाभावात् कथञ्चन शरीरप्रवृत्तिः । तत्रोच्यते-

"लोके वेदे तथा कृष्णो लक्ष्मीभर्तृतयोच्यते ।
सुखं विना पतित्वं हि न लोके न च वैदिके ॥
यथा निधिपतिः कश्चित् निधेर्भोगं विनापि हि ।
स्वरूपेनैव सुखवान् तदीयाभिनिवेशतः ॥
अदृष्टजन्यो यो भोगः लोक एव तु संमतः ।
ईशे तु नित्यो विज्ञेयः लक्ष्मीभर्तृतया बुधैः" ॥

लक्ष्म्या अनादिसिद्धत्वात् भोगोप्यनादिसिद्धः तथा च नित्यसुखवानीशः ॥२१॥

न च नित्यसुखत्वे कथं भक्तसेवया सुखमिति वाच्यं भक्तसेवया आविर्भावकत्वात् समुद्रवत् । नहि चन्द्रदर्शनादर्शनाभ्यां जलोत्पत्तिर्नाशो वाऽपि तूच्छलनं स्थिरता च-स्मृतिश्च । "भूर्य्यप्यभक्तोपहृतं न मे तोषाय कल्पते । पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति । तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः" इत्यत्र भोगं विना भक्ताभक्तविभागो न स्यात् । फलदातृपक्षे समत्वात् "आनन्दभुक् चेतो मुख इति" श्रुतेः "रमालालितपादपल्लव" इति, "इच्छामात्रं प्रभौ सृष्टिरिति सृष्टौ विनिश्चितेति" मण्डूकोपनिषदि । नह्यनिष्टविषयिनीच्छा तत्र आनन्दाविर्भावकत्वं सृष्टेः, मण्डूकोपनिषदि-भोगार्थं सृष्टिरित्यऽन्ये क्रीडार्थमिति चापरे" इति । नत्वदृष्टाभावात्कथं भोग इत्याक्षेपपरिहारार्थं श्रुतिः-"देवस्यैष स्वाभावोऽयमाप्तकामस्य का स्पृहेति" यद्यपि आप्तकामस्य जीववत् कापि स्पृहा न भवति तथापि देवस्येश्वरस्यायमेव स्वभावः भोगः अलीकजीववद्भोगो नापि तु महाराजवत् । नहि चक्रवर्तिनि खंडमंडलेश्वराणां विषयकृतो भोगोऽपि तु महाराजस्य मदीयोऽयमिति एतावन्मात्रम् । वस्तुतस्तु सर्वेन्द्रियभोगः श्रीकृष्णस्यापि परं त्विदं रहस्यं शुद्धया भक्त्या ग्राह्यं । पाद्मे विंशेऽध्याये "अच्युतं शाश्वतं दिव्यं सदा यौवनमाश्रितं । नित्यं संभोगमैश्वर्य्या श्रिया भूम्या च संवृतमिति" । ततश्च नित्यानंदादिमयशरीरेन्द्रियवत्वं भगवति, शरीरं तु अचिन्त्यातर्क्यानन्तशक्तिमत् परिच्छिन्नं च व्यापककिरणाश्रय सूर्य्यवत् ॥२२॥

ननु व्यापकमेव भगवच्छरीरं श्रुतिप्रामाण्यात् तत्तद्भक्तानां तत्र तत्रानुभूयमानत्वाच्च परिच्छिन्नत्वे सर्वभक्तानां युगपत्सर्वास्वादः सेवनं च न स्यात् इन्द्रियादीनामपि परिच्छिन्नत्वे द्रौपदीगजेन्द्रादिकृताक्रोशनादिश्रवणं न स्यात् । श्रुतिश्च "सर्वतः

पाणिपादं तत्सर्वतोक्षिशिरोमुखमिति" श्रुत्यन्तरे च-तदेव सर्वतो मुखमेतदिति । तस्माद्व्यापकमिति अत्रोच्यते-"तत्वे स्थानस्य नियतेरीश्वरस्य गतेस्तथा । सिद्धानां गमनस्यापि व्यर्थथा केन वार्यताम् । व्यापकत्वे तत्वे वैकुंठव्यर्थता स्यात् । नहि लूतातंतु र्हस्त्याश्रयः, नहि लूतातंतुर्हस्तप्रियः । तथा भागवते च-"यदि दूरं गतः कृष्णः इत्यादिगमनास्वादक-भक्त--गमनस्य भक्तपरिच्छिन्नविषयत्वात् प्रियभक्तप्रतारणा च स्यात् । नहि अन्यथा स्थितं वस्त्वन्यथा प्रदर्शकस्य हितकर्त्तृत्वं, यथोक्तं सर्वदेशे सर्वभक्तसेवनादिकं तत्र विचारणीयं तत्तद्देशस्थ-भक्तानां सर्वस्वरूपसेवनं वा तत्तत्प्रदेशमात्रं वा अन्त्ये सर्वांगसेवनस्य श्रूयमाणत्वात् । आद्ये भक्तस्यापि देहेन्द्रिययोः व्यापकत्वप्रसंगात योगजधर्मस्वीकारे ईश्वरनिष्ठ एव अचिन्त्यधर्मः स्वीकीयतामावश्यकत्वात् ॥२३॥

किंच "नचान्तर्न बहिर्यस्य न पूर्व्वं नापि चापरमिति" "तावंघ्रियुग्ममनुकृष्य सरीसृपंताविति च" । श्रुतौ च सर्वतो मुखः असर्वतो मुख इति च । युवाऽकुमारः प्रत्येत्याहवं अकुमारः सन् युवा आहवं नामोच्चारकं प्रति एति आगच्छतेति । ततोऽचिन्त्यपरिच्छिन्नं तत्र शरीरं वा व्यापकं सूर्य्यकिरणवत्तादात्म्यापन्नो धर्मो वा भवतापि भक्तेषु व्यापकानुपयोगादचिन्त्यशक्त्या परिच्छिन्नमेव स्वीकरणीयः "ऐश्वर्य्ययोगाद्भगवान् विरुद्धार्थोऽभिधीयते । तथापि दोषाः परमे नैवाहार्य्याः कथंचनेति" कौर्म्ये । ततश्च लाघवादुपदेशागमध्यानसेवनवैकुण्ठादिविलासक्रीडादि - प्रामाण्यादचिन्त्य-परिच्छिन्न एव श्रीविग्रहः पूर्णत्वादयो धर्माः । अन्यथा श्रुत्यादेर्व्याकोपः स्यात्तथाहि सर्वतो मुखता असर्वतो मुखता च तत्र च सर्वतो मुखतार्थेन असर्वतो मुखता स्वरूपेण । नृसिंहोपनिषदि- अथ कस्मादुच्यते सर्वतो मुखमिति यस्मादतीन्द्रियोऽपि सर्वतः

पश्यति सर्वतः शृणोति सर्वतः गच्छति सर्वतः आदत्त स सर्वगः सर्वगः सर्वतस्तिष्ठत्येकपुरस्तात् परतो बभूव तस्मादुच्यते सर्वतो मुखमिति। अनया श्रुत्या प्रत्यक्षादिप्रमाणागममंत्रांगपूजादिविरोधं दूरीकर्त्तुं श्रीभगवत्या श्रुत्यार्थः स्वीकृतः सर्वं पश्यन्तः सर्वतश्चक्षुः, सर्वं शृणोति सर्वतः कर्णः, सर्वं गच्छति सर्वतः पादः, सर्वमादत्ते सर्वतो हस्तः, इत्याद्यर्थं स्वीकृत्योक्तं सर्वतः पाणिपादं इत्यादि। अन्यथा यथा सर्वतो मुखता व्याख्याता तथाऽसर्वतो मुखतापि व्याख्याता स्यात्। तथाहि नृसिंहोपनिषदि-बिष्णुमविष्णुं ज्वलन्तमज्वलन्तं सर्वतो मुखमसर्वतो मुखं भीषणमभीषणं नमाम्यहमनहं नृसिंहं त्वानुष्टुभैव बुबुधिरे इत्यादि तच्छरीरं तच्चेंद्रियस्वाद्यं ग्राह्यं च। न च स्वप्रकाशतां व्याघातात् जडत्वं च स्यादिति वाच्यं इन्द्रियास्वाद्यत्वेऽपि स्वप्रकाशानपगमात् नहि चक्षुषा ग्राह्येऽपि सूर्य्यस्य स्वप्रकाशता भंगः चैतन्याश्रयभिन्नत्वमेव जडत्वे प्रयोजकमन्यथा दीपोऽपि चैतन्यं स्यात्। तदुक्तं पाद्मे हरिं प्रति व्यासवाक्यं "त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन!। यत्तत्सत्यं परं ब्रह्म जगद्योनिं जगद्गतिं। वदन्ति वेदशिरसश्चाक्षुषं नाथ मेऽस्तु तदिदि'। यत्र तु श्रुत्यादिषु इन्द्रियाग्राह्यत्वं तत्र स्वात्मविषयकत्वं ज्ञेयं शरीरविषयस्यैव (विशिष्टस्यैव) प्रत्यक्षत्वात् नारदपञ्चरात्रे-'समस्तमिदमाक्षिप्तं यस्माच्च पवनात्मना। तस्माच्च सर्वपाणित्वं सर्वगः स्थाणुमीयते। उद्र्ध्वादूर्ध्वस्तिर्य्यगैर्यद्वत् भासते रश्मिभिः रविः। तत्प्रकाशकरूपत्वात्सर्वचक्षुरजः स्मृतः। समत्वात्पावनत्वाच्च सर्व-सर्वशिरः स्मृतः। सदानंदरसा सर्वे तस्य सन्ति सदैव हि। सर्वत्र शान्तरूपस्य ततः सर्वमुखः स्मृत' इति पर्वतं प्रति नारदोक्तिश्च "आत्मा ज्ञानमयत्वाच्च व्यापकस्तु स्वशक्तितः। सूर्यादेरप्रकाशत्वात् स्वयंज्योतिरुदाहृतः'। वस्तुतस्तु अलौकिके वाक्यमेव प्रमाणं न

युक्तिः। उक्तं च पुरुषोत्तमतन्त्रे-यद्वाक्ययोक्तं न तद्युक्तिविरोद्धुं शक्नुयात् क्वचित्। विरोधवाक्ययोः क्वापि किञ्चित्साहाय्यकारणमिति'। 'ये दोषा इतरत्रापि ते गुणाः परमे मताः। न दोषः परमे कश्चिद्गुणा एव निरन्तरमिति' ॥२४॥

ननु सृष्टेः पूर्वं 'सदेव सौम्येदमग्र आसीत् ब्रह्म वा इदमग्र आसीदि'त्यादिना ब्रह्मण एव पूर्वभावित्वं श्रूयते नतु विग्रहस्य सृष्ट्यादिमध्य एव श्रीवाराहादेः श्रूयमाणत्वात् राक्षसबधादिद्वारा धर्मरक्षार्थमिति चेत् न विग्रहस्यैव श्रुतिपुराणादिषु श्रूयमाणत्वात् अन्यथा सदेव सौम्येदमित्यादिवैयर्थ्यं स्यात्। नहि तदा जीवात्मनामभावोऽपि तु देहादीनामेव। तथाहि-ओं अथातो महोपनिषदमेव तदाहुरेकोऽहं वै नारायण आसीन्न ब्रह्मा न ईशानो नापो इत्यादि महोपनिषदि। इदं तु रहस्यत्वेनोक्त ओं अथातो महोपनिषदमेवेति अथातः एतदनन्तरं महोपनिषदमेव महारहस्यमेव किं तत् नारायण आसीदित्यादि नारायणशब्दः शरीरबाचक एव। नारायणोपनिषदि 'पुरुषो ह वै नारायणोऽकामयत अथ नारायण आसीदित्यादि अथ नारायणात् रुद्रो जायते यतः प्रजाः सर्वाणि भूतानि नारायणादेव समुत्पद्यन्ते नारायणे प्रलीयन्त नारायणे प्रलीयन्त इति' 'बिश्वतश्चक्षुरुत बिश्वतो मुखो बिश्वतो बाहुरिति' 'नारायणः परं ब्रह्म तत्वं नारायणः परः। ऋतं सत्यं परं ब्रह्म पुरुषं ब्रह्मपिङ्गलं' इत्यादिना वर्णोक्तिश्च। एवं वैकुण्ठादिभगवल्लोकोपि नित्य एव। बिशेषो लोकप्रकरणे बक्ष्यामः। ततश्च सर्वेऽवताराः सर्वाणि स्थानानि पार्षदाश्च नित्याः ॥२५॥

नन्ववताराणां नित्यत्वेऽनेकेश्वरत्वं स्यात् ततश्चैके एवेश्वरः शरीरी तत्तद्भक्तानां तथा तथा प्रतीयत इति अतो भक्तानामेवेच्छा नियामिका न तु स्वरूपभेदः संकोचविकाशन्यायेन कूर्म्मनृसिंह-

त्वादिप्रतीतेः । तस्मादीश्वरशरीरमेकमेव । अत्र ब्रूमः द्विभुजत्व-चतुर्भुजत्वबालत्वकिशोरत्वकूर्मत्वनृसिंहत्वादि आकाराणां नित्यत्व-मस्ति न वा नित्यत्वे सिद्धो भेदः अनित्यत्वे निर्द्धर्मकब्रह्ममत-प्रवेशः, अन्यच्च तत्तदाकारोऽस्ति न वा ? अस्तित्वे भेदः नास्ति चेत् असद्वस्तु प्रदर्शनेन भक्तानामहितकारी स्यात् । किं च तत्स्व-रूपं च निरूपणीयं येन नित्येनानित्यं प्रदृश्यते किमिति च भक्तानां नित्यं स्वरूपं न प्रदृश्यते न च भक्तानामिच्छया प्रदृश्यत इति वाच्यं उपदेशपरम्परया भक्तेच्छाया नित्यबिषयत्वात् न च मार्कण्डेयादिवत् सर्वेऽसद्दर्शनेच्छावंतः, नृसिंहराघवेन्द्रसेवकानां प्रल्हादहनूमदादीनां नित्यत्वेन वेदागमादिषु निर्धारितत्वात् । तर्हि कथमेक एव नारायण आसीदित्यादावैक्यं को ब्रूतेऽनेकत्वं न वयं भगवदात्मनोऽनेकत्वं ब्रूमोऽपि तु नृसिंहाद्याकाराणामबा-धितनित्यत्वं चित्रपटवत् । तथोक्तं नारदपञ्चरात्रे-'मणिर्यथा विभागेन नीलपीतादिभिर्युतः । रूपभेदमवाप्नोति ध्यानभेदात्तथा हरिरिति' । केचिद्वैष्णवंमन्या एक एवेश्वरोंऽशी कार्य्यार्थं तत्त-दाकारः कार्य्यावसाने ऐक्यं । परमसंहितायां च-'अंशिनस्तु पृथक् जाता अंशास्तस्यैव कर्मणा । पुनरैक्यं प्रपद्यन्ते नात्र कार्य - विचारणेति' मन्यंते । तत्तु न चारुतरं वैष्णवत्वव्याघा-तात् तथाहि इदं त्वद्वैतवादिना वक्तुं शक्यते न तु वैष्णवेन, उपा-स्याकारस्यानित्यत्वे भक्तितद्वैकुण्ठतद्भक्तानामनित्यत्वं स्याद्द्वैत-मतमोक्षो वा तर्हि कथं पुनरैक्यं प्रपद्यत इति बाक्यार्थः-बिभूतौ शक्त्यंश प्रवेशो अतो न विरोधः । तस्मा-दीश्वरस्यैकत्वे न तत्तदबतारश्रीमूर्त्तीनां च भेदत्वं सिद्धं । अत-एवाबतारावतारित्वेन सर्वत्र विभागः । सदाविर्भूतसर्वशक्तिम-त्वमबतारित्वं, यथा कार्य्यमाविर्भूतशक्तिमत्वमबतारत्वमिति बिवेकः । अतएवाबतारेषु अवतार्य्यात्मप्रवेशादंशः अन्यात्मनि

ज्ञानवैराग्यादि प्रवेशात् कलाबतारः सजातीयोत्कर्षाद्विभूतिः ॥२६॥

ननु तर्हि कस्यावतारित्वं श्रीकृष्णस्येति ब्रूमः श्रुतिस्मृत्यागमैः कृष्णोऽबतारित्वेन चोच्यते 'अवताराबतारीत्वं भेदाभेदे व्यवस्थितं । आत्मैक्यादेकता ज्ञेया शरीराद्भेद उच्यते' । श्रुतौ तावत् केनोपनिषदि- केनेषितं मनः पतति प्राणः प्राणस्य प्राणः चक्षुश्चक्षुरति मुच्य धीराः । प्रेत्यास्माल्लोकादमृता भबन्तीति उपक्रम्य तदेव ब्रह्म त्व बिद्धि इत्यादि मध्ये उक्त्वा अमृतत्वं हि बिन्दते आत्मना बिन्दते बार्य्यं बिद्यया बिन्दते सत्यमायननं यो वा एतामुपनिषदं वेदापहत्य पाप्मा नमनंते स्वर्गे लोके ज्येये प्रतितिष्ठतीति उपसंहृतम् । तत्र को वा स्वर्गः किं तद्ब्रह्मेत्यपेक्षायामाह-पुरुषो ह वै नारायण इत्युपक्रम्य पुनश्चाभ्यासेन नित्यो देव एको नारायणः पश्चान्नारायणोपासकस्य स्तुतिं कृत्वा ततः पूर्वोपनिषदि स्वर्गत्वेन यो लोक उक्तः तं प्रतिपाद्य बैकुंठबनलोकं गमिष्यति तदिदं पुरमिदं पुंडरीकं बिज्ञानघनं तस्मात्तदिहाबभासमिति बैकुंठत्वेन प्रसिद्धस्य बनलोकस्यानन्दात्मकं प्रतिपाद्य तस्येश्वरमाह ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यः सोपनिषदमधीते इति श्रीकृष्णस्यावतारित्वमायाति । ननु मत्स्यादयः समाः को श्रुते बिषमाः ऐश्वर्ये समा एव नतु स्वरूपे । उक्तं च वराहे-मत्स्यकूर्म्मबराहाद्याः समाः बिष्णोरभेदतः । ब्रह्माद्यास्त्वसमाः प्रोक्ताः प्रकृतिश्च समासमेति ॥ आकाराणामेव भेदो नात्मन इति ज्ञेयम् । छान्दोग्ये पंचमप्रपाठकेऽध्यायांश्च पुरुषः सर्वं खल्विदं ब्रह्म यत्प्राणा आदित्या इत्याद्युक्त्वा पश्चादुपसंहृतं कृष्णाय देवकीपुत्रायोक्त्वाबाच-पियासेत्यादिना । ननु श्रीनारायण एवावतारीति चेत्सत्यं श्रीनारायणे ब्रह्मत्वं विधायोपसंहारे ब्रह्मण्यो देवकीपुत्र इत्युपसंहाराद्देवकीपुत्रे नारायणत्वं बिधीयते । ननु श्रीनारायण एव देबकीपुत्र इति किं

न स्यात् ब्रह्मप्रार्थनास्वारस्यादिति चेन्न। श्रीभागवतवाक्यविरोधात्। नारायणोऽगं नरभूजलायनादिति अन्यथा श्रीनारायणोपासकस्य ब्रह्मणोऽनेकनारायणदर्शनं न स्यात्। न ह्यवतारिण्यानन्त्यं, तासां मध्ये द्वयो द्वयोरित्यत्र तासामास्वादः नैकटयं च न च भेदः। एते चांशकलाः पुंसः कृष्णस्तु भगवान स्वयमिति श्रीभागवतपदद्वयस्याबाध्यत्वात्। ननु यत्सेवको यः तमनुसारित्वेन मनुत इत्येव तत्वमिति चेत् न। मिथ्यात्वेन प्रतीकोपासना नतु भक्तिः अन्नं ब्रह्मेतिवत् अवतारावतारिभेदस्य केनापि प्रकारेण नियमितत्वात् अन्यथा देवत्वे देवदेहेयं मनुष्यत्वे च मानुषीति पदस्य योजयितुमशक्यं स्यात्। प्रह्लादसंहितायां च प्रथमेऽध्याये ब्रह्मवाक्यं ऋषीन् प्रति 'मत्स्यकूर्मादिरूपैस्तु भगवानर्च्यते सदा। विष्णोः परामिमां मूर्त्तिं न जानामि द्विजोत्तमाः' इत्युक्त्वा प्रह्लादं गच्छत स जानाति ततो गत्वा तैः प्रह्लादः पृष्टः प्रश्नानन्तरं प्रह्लादेन श्रीकृष्णः कथितः सर्वोत्तमेनेति। तर्हि श्रीनारायण एवावतारी भवतु यथा तथावतारावतारिभेदस्तु नियत एव नियतत्वे सिद्धे योऽवतारी स एव श्रीकृष्णः सर्ववाक्यनां तत्रैव समन्वयात्। तथाहि-'शब्दब्रह्म परब्रह्म ममेभि शाश्वती तनू। मदीयं महिमानं च परब्रह्मेति शब्दितम्'। तथाहि एकादशे-'नारायणाभिधानस्य ब्रह्मणः परमात्मनः। निष्ठामहथ नो वक्तुं यूयं हि ब्रह्मवित्तमा' इति स्वरूपं पृष्टं तदुत्तममिति 'स्थित्युद्भवप्रलयहेतुरहेतुरस्य यः स्वप्नजागरसुषुप्तिषु सद्बहिश्च। देहेन्द्रियासुहृदयानि चरन्ति येन संजीवितानि तदवैहि परं नरेन्द्र' इत्यनेन नारायणब्रह्मपरमात्मनां प्रवृत्तिनिमित्तं यत्र तत्परं तत्वमित्युक्तं परस्यैवावतारित्वं नहि नारायणपदप्रवृत्तिनिमित्तं ब्रह्मपरमात्मनोः, न वा ब्रह्मपरमात्मपदप्रवृत्तिनिमित्तं नारायणे। अतो नारायणादीनां धर्मत्वं परतत्वस्य धर्मित्वं। न च ब्रह्मणः कुत्राप्य-

बतारत्वं न दृष्टमिति वाच्यं। कार्य्येणैवावतारत्वोक्तेः स्वप्न-जागरसुषुप्तिसु सद्वहिश्चेति कार्य्यत्वात्। परतत्वं श्रीकृष्ण एव ब्रह्म शब्दः सर्वत्र श्रीकृष्णविशेषणमेव। तदुक्तं पाद्मे 'पृथक् वक्तुं गुणास्तस्य न शक्यन्तेऽमितत्वतः। यतोऽतो ब्रह्मशब्देन सर्वेषां ग्रहणं भवेत्। एतस्माद्ब्रह्मशब्दोऽसौ कृष्णस्यैव विशेषणं' इति। ब्रह्मसंहितायां आदिपुरुषरहस्यस्तवे—

यस्य प्रभा प्रभवतो जगदण्डकोटि-
कोटिष्वशेषवसुधादिविभूतिभिन्नम् ।
तद्ब्रह्मनिष्कलमनन्तमशेषभूतं
गोविन्दमादिपुरुषं तमहं भजामि ॥

तत्पद्वाच्यं यन्निष्कलं ब्रह्म तत् यस्य गोविन्दस्य प्रभा किरणवत् सूर्य्यस्य तं गोविन्दं भजामि ।

'यस्यैकनिश्वसितकालमथावलम्ब्य-
जीवन्ति रोमबिलजा जगदण्डनाथाः।
बिष्णुर्महानपि स यस्य कलाविशेषो
गोविंदमादिपुरुषं तमहं भजामि॥

तथा श्रीमुखवाक्यं श्रीगीतोपनिषदि—

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य चेति॥

उद्यमपर्वणि भीष्मवाक्यं-एष नारायणः कृष्णः फाल्गुनश्च नरः स्मृतः। नारायणो नरश्चैव सत्वमेकं द्विधा कृतं' ॥ एष-पदेन कृष्णे नारायणत्वं विधीयते नरेऽर्जुनत्वमिति।

तथा तृतीये—

दशोत्तराधिकै यत्र प्रविष्टः परमाणुवत् ।
लक्ष्यंतेऽन्तर्गताश्चान्ये कोटिशो ह्यंडराशयः ।
तमाहुरक्षरं ब्रह्म सर्वकारणकारणम् ।

तथा श्रीगीतासु—

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ?।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥

श्रीभागवते—

यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः ।
तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ॥

द्वितीये—

सर्गे तपोऽहमृषयो न च ये प्रजेशाः,
स्थाने च धर्म मखमन्वमरावनीशाः ।
अन्ते त्वधर्म हरमन्यु वशा सुराद्या,
माया-विभूतय इमाः पुरुशक्तिभाजः ॥

विष्णुपुराणे—

शक्तयो यस्य देवस्य ब्रह्मविष्णुशिवात्मिकाः ।
भवन्त्यभूतपूर्वस्य तद्विष्णोः परमं पदम् ॥

तथा विष्णुपुराणे पंचमेंशेऽक्रूरवाक्यं—

मत्स्यकूर्मवराहैश्च सिंहरूपादिभिः स्थितिं ।
चकार जगतो योऽतः सोद्य मामालपिष्यति ॥
विभर्षि रूपाण्यवबोध आत्मन,
क्षेमाय लोकस्य चराचरस्य ।
सत्वोपपन्नानि सुखावहानि,
सतामभद्राणि मुहुः खलानां ॥
नानाभावैर्लीलयैवोपपन्नै,
र्देवान् साधून् लोकसेतून् विभर्षि ।
हंस्युन्मार्गान् हिंसया वर्तमानान्,
जन्मैत्तत्ते भारहाराय भूमेः श्रो' ॥

इति भागवते । नारदोक्तब्रह्मविद्यायां-'कलावतारः शेषाख्यः सहस्रफणमौलिवान् । अनन्तोऽस्याभव तत्र जीवांश उपलभ्यते । तृतीयोंऽशावतारोऽभूदादिनारायणाभिधः । अवतारसहस्राणि श्रीकृष्णस्य महात्मनः' । यद्यवतारेऽवतारित्वोक्तिः सत्या स्यात्तर्हि एतन्नानावताराणां निधानं वीजमव्ययमित्याद्युक्तेः वैयर्थ्यं स्यात्। यत्र तु स्तुत्यादिषु अवतारित्वप्रतिपादनं तेनैव वपुषा युवामिति भागवदुक्तिः सा स्वात्मविषया नतु विशिष्टविषया श्रीकृष्णे स्वावाधितमेवावतारित्वम् ॥

यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः ।
तैस्तैर तुल्यातिशयैर्वीर्य्यैर्देहिष्वसंगतेः ॥
सुरेष्वृषिष्वीश तथैव नृष्वपि,
तिर्यक्षु यादःस्वपि ते ऽजनस्य ।
जन्मासतां दुर्मद निग्रहाय,
प्रभो विधातः सदनुग्रहाय च ॥
मत्स्यश्च कच्छप नृसिंहवराह-हंस,
राजन्यविप्र विवुधेषु कृतावतारः ।
त्वं पासि नस्त्रिभुवनं च यथाधुनेश,
भारं भुवो हर यदूत्तम वन्दनं ते ॥

आगमे च श्रीकृष्णपूजायां—
वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ।
अग्न्यादिदलशूलेषु ( मूलेषु ) संपूज्यास्तु सुवुद्धिना ।
प्रल्हादसंहितायां प्रथमाध्याये ब्रह्मवाक्य ऋषीन् प्रति--
मत्स्यकूर्मादिरूपैस्तु भगवाच्चर्तते सदा ।
विष्णोः परामिमां मूर्त्तिं न जानाभि द्विजोत्तमाः ॥

पश्चात् प्रल्हादोपदेशेन ऋषयः श्रीकृष्णं ज्ञातवन्तः। स्वायम्भु-

बागमे पंचाशीतिपटले ध्यानप्रस्तावे-

धर्मार्थकाममोक्षाख्यचतुःपादविराजिते ।
ब्रह्मविष्णुमहेशानां शिरोभूषणभूषिते ।
तत्र प्रेम भराक्रान्तं किशोरं पीतवाससमिति ॥२७॥

ननु बाल्यादि अनुक्रमेण यौवनप्रतीतेः कालव्याप्तत्वात् कथं नित्यत्वमिति चेन्न अजरामरादिपदैरेव नित्यत्वसिद्धेः उपसंहृतदिग्भागः ( दिव्यांगः ) ससंकोचविकाशाभ्यां वर्त्तते । नित्यं षोडशवार्षिकमित्यादिपदैर्नित्यत्वसिद्धेः । किं च सर्व्वधर्माणां भगवति विद्यमानत्वात् भक्तानां यथा यथेच्छा तत्तथैवाचिन्त्यशक्तीनामयमेव स्वभावः विरोधाप्रतीतिरिति । ऋग्वेदे द्वितीयाध्याय-द्वितीयाष्टक-पंचविंशतिबर्गे षष्ठीऋक् चतुर्भिः साकं नवतिं च नामभिश्चक्रं वृतं व्यतीरवीवियत् वृहच्छरीरो विमिमान् ऋक्वभियुवाकुमारः प्रत्याहवं वहुभि र्नामभिश्चतुर्व्यूहनामभिः व्यनी शरीराणि अवीवियत् उत्पादयामास नवतिं असंख्यातानि ऋक्वभिश्चरणैः विमिमान नकार उपमानार्थः यथा वृत्तं चक्रं सूर्य इवेत्यर्थः। आहवं आह्वानं प्रति कीर्त्तनं प्रति प्रत्येति आगच्छति अकुमारः सन् युवा कुमारक्रमं विना नित्ययुवेत्यर्थः । सकललावण्यसौन्दर्य्यादिनिधाने श्रीकृष्णेऽतस्य-परिच्छिन्नता ज्ञेया । सर्वतः पाणिपादान्तः सर्वतोऽक्षिशिरो मुखः । सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठतीत्यादिकं च, सर्वतः सर्वभक्तनिकटेऽचिन्त्यशक्तित्वात् । प्राकृतेऽपि तेजसि लक्षयोजनस्थितसूर्य्यसम्बंधिनि तत्क्षणमेव भूमौ प्रकाश । किमु वक्तव्यं भगवति भक्तजीवानुभूते। अन्यथा भक्ताभक्तविभागं विना सर्वतो राहित्यं न स्यात् । तथा नृसिंहोपनिषदि-तुरीयातुरीयमात्मा तमुग्रमनुग्रं वीरमवीरं महान्तममहान्तं विष्णुमविष्णुं ज्वलन्तमज्वलन्तं सर्वतो मुखमसर्वतो मुखमित्यादिषु भक्तेषु वृत्तिरभ-

क्तेषु वैपरीत्यं यथा योग्यं ज्ञेयं, एवमन्यत्र. अतएवोक्तं प्रश्नोत्तरे अथ कस्मादुच्यते मृत्युमृत्युमिति यस्मात्स्वभक्तानां स्मृत एव मृत्युमपमृत्युं च मारयति इत्यादि । अथ कस्मादुच्यते भगवान्महेश्वरो यस्मात् भक्तान् ज्ञानेन भजत्युद्गृन्हाति । अथ श्रीकृष्णे ज्ञानं त्रैविध्यं एकं स्वरूपनिष्ठं सत्यं विज्ञानमानन्दं सच्चिदानन्दं, द्वितीयं गुणाः 'ऐश्वर्य्यस्य समग्रस्य धर्मस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरितः,तृतीयमिन्द्रियनिष्ठं 'साधवो हृदयं मह्यं साधूनां हृदयं त्वहं । मदन्यं ते न जानन्ति नाहं तेभ्यो मनागपि'। तत्र स्वरूपेन्द्रियज्ञानयोर्भक्त एव विषयः गुणस्य तु सर्वोऽपि विषयः । तेनैव सर्वज्ञता नतूभाभ्यां । श्रीकृष्णस्यावतारित्वमन्येषामवतारत्वं शृंगग्राहकन्यायेनाक्रूरस्तुतौ नमः कारणमत्स्यायेत्यादिना रघुनाथादीनां धर्मत्वमुक्त्वा 'स्तुवतस्तस्य भगवान् दर्शयित्वा जले वपुः । भूयः समाहरत् कृष्णो नटो नाट्यमिवात्मन' इत्यनेन धर्मित्वं । नहि नटे किमपि मिथ्यापि तु सर्वमुपकरणं, नहि सामग्र्यभावे नटः किमपि कर्त्तुं शक्नोति सामग्र्या सहैव तिष्ठति, ततः श्रीकृष्णस्यावतारित्वे सिद्धेऽवतारित्वं विचार्य्यते । सदाविर्भूतसर्व(षट्) गुणवत्वमवतारित्वं । यथा कार्य्यषट्गुणान्यतमाविर्भूतशक्तिमत्वमवतारत्वं यद्वा स्वरूपप्राधान्यमेवावतारित्वं गुणप्राधान्यमेवावतारत्वं । केचित् आत्मप्रभैव ज्ञानं सच्छिद्रघटस्य दीपप्रभावत् तन्न । सुखसत्ता ज्ञानं विषयो घट इति त्रितयोल्लेषः स्यात् । आत्मनः सत्यानंदज्ञानस्वरूपत्वात् यथा ज्ञातो घटस्तथा सुखविषयोल्लेषः स्यात् । अत आत्मा भिन्नः विषयेन्द्रियसंयोगात् ज्ञानमुत्पद्यते । तदुक्तं भास्कराचार्य्येण अथातो ब्रह्मजिज्ञासेति सूत्रविचारे । तस्मादालोकेन्द्रियादिभ्यो ज्ञानमुत्पद्यते । तदभावे न अत आत्मचैतन्यात् ज्ञानं भिन्नमिति । नारदोक्तब्रह्मविद्यायां-'यथायसः संनिधानात्सूर्यकान्तस्य वा

रवे: । शुष्कगोमयपिण्डस्य सांमुख्यात्सूर्य्यतेजस: । शक्त्यावेश-स्तादृश: स्यात्येनानलसमुद्भव: । तादृशी शक्तिरप्योस्ति यथा तोयादितापनम् । शक्त्यावेशस्तयोरेवं योगमायास्वमाययो: । अंश: कला च भूयस्त्वादल्पीयस्त्वाच्च कार्यत:' । अतएव क्वचिद् गुण-प्रधानकार्येणावतारिण्यवतारत्वोक्ति: स्वरूपप्रधानकार्येणावतारे-ऽवतारित्वोक्तिश्च न विरुद्धा उभयोरुभयत्र प्राधान्यानपायात् तदुक्तं पाद्मे चतुर्स्त्रिंशे-'एतत्ते कथितं देवि ! नृसिंहं वैभवं हरे: । शेषां च वैभवावस्थां शृणु देवि ! यथा क्रमं' । यथा त्रिगुणावता-रत्वं ब्रह्मादौ तथा षट् गुणावतारत्वं श्रीवाराहादौ । उक्तं च पंचमे-साक्षाद्धरिं ज्ञानकलावतीर्णमिति । ज्ञानकला ज्ञानशक्ति: तन्मध्ये क्वचिद्भक्तात्मनि क्वचिदीश्वरात्मनीत्यर्थादूह्यम् ॥

वैभवावस्थमीशस्य मत्स्यकूर्मादिरूपकम् ।
विस्तरेण समाख्याहि मम प्रीत्या महेश्वरेति ॥

एते चांशकला: पुंस: कृष्णस्तु भगवान् स्वयम् इति । केचिदंशा: केचिदंशाविष्टत्वादंशा: केचित्तु कला: केचिद्विभूतय: । एकोनविंशे विंशतिमे वृष्णिषु प्राप्य जन्मनि । रामकृष्णाविति योऽवतारत्वेन कथित: स कृष्ण: भगवान् ऐश्वर्य्यावध्यधिकरण: । अन्यथा मत्स्यादिरपि भगवानेव ततश्च मत्स्यादिषु तरतमभावेन भगवत्ता श्रीकृष्णे तु अवधिभूता भगवत्ता । पुरुषावतारस्यापि योऽवतारो तस्यापि अवधिरित्यर्थ: । ततश्चायमर्थ:-कृष्ण: भगवान् अव-तार्यवधि: तु शब्दात् पुन: स्वयं च भगो विद्यते यस्यासौ भग-वान् । भग: ऐश्वर्य्यं तद्वान् , ऐश्वर्य्याद्भिन्नश्च । यथा दण्डवान् देवदत्त: दण्डो भिन्न:, देवदत्तस्तु भिन्न: । ततश्चैश्वर्य्य-गुणवान् श्रीकृष्ण: पुन: स्वयं च रसरूप: कृष्ण: । अयमर्थ: ऐश्वर्य्यादि: कृष्णस्य वैभवं रसरूपता स्वरूपं । तथा च श्रुति:-'रसो वै स:' 'रसं ह्येवायं लब्ध्वा नन्दी

भवतीति' अग्निवत्। नह्यग्नेर्दाहकत्वं प्रकाशकत्वं सर्वभक्षित्वं स्वरूपोऽपि तु वैभवं। स्वरूपं तु शरीरित्व-शीतलत्व-भोगित्वादि-कमन्यथा स्वकलत्रपुत्राणां दाहकत्वेन शत्रुरेव स्यात् तद्वत् श्रीकृष्णेऽपि वैभवावस्थायां ऐश्वर्य्यं धर्मः स्वरूपं तु रसरूपमेव। नहि अग्नेर्दाहकत्वं प्रकाशकत्वं सर्वभक्षित्वं स्वरूपे प्रविशति। तदुक्तं ब्रह्माण्डे-'सहस्रनाम्नां पुन्यानां त्रिरावृत्त्या तु यत्फलम्। एकावृत्त्या तु कृष्णस्य नामैकं तत्प्रयच्छतीति'। यदप्यपि 'सहस्रनाम तत्तुल्यं रामनाम वरानने' इत्युक्तं पार्वतीं प्रति श्रीरामनाम्नः प्राशस्त्यम्, यद्वा पार्वतीभोजनविधानार्थं सहस्रनामपाठानन्तरभोजननियमात्। नहि कृष्णनाम्नि प्राशस्त्यं द्योत्यते। सहस्रनाम्नामिति बहुत्व-निर्देशात्। किं च यदि तथात्वं तर्हि रामकृष्णनाम्नोः स्वरूपोक्ति-निर्णयो न स्यात्तथाहि-पातालखंडे मथुरामहात्म्ये। 'तारकाज्जायते मुक्तिः प्रेमभक्तिस्तु पारकात्'। तारकः राम इति, पारकः कृष्णेति। प्रभासखंडे-कुशध्वजं प्रति नारदवाक्यं-नाम्नां मुख्यतरं नाम कृष्णाख्यं मे परंतपेति। किं च श्रीकृष्णे चेदवतारित्वं केनापि वैलक्षण्येण तर्हि तन्नाम्नि तद्वैलक्षण्यमर्थप्राप्तम्। 'नाम-चिंतामणिः कृष्णः चैतन्यरसविग्रहः। पूर्णः शुद्धो नित्यमुक्तोऽभि-न्नत्वान्नामनामिनोः। अथ षड्गुणावतारा:।

षड्गुणैः षड्गुणाः षोढा षट्त्रिंशद्भेदगाः मता।
यत्र यस्य प्रधानत्वं स तेनैव विचार्य्यते।
नृसिंहो यामदग्न्यश्च कल्की पुरुष एव च।
ऐश्वर्य्यकृतिकर्त्तारस्तत्र ऐश्वर्य्यमुख्यगाः॥

चतुर्ष्ववतारेषु षण्णां मध्ये ऐश्वर्य्यस्य प्राधान्यं पंचानां गौणत्व-मतएवैश्वर्य्यद्वारैवान्यत्कार्य्यं तदुक्तं पाद्मे चतुस्त्रिंशे-'एतत्ते कथितं देवि! नृसिंहवैभवं हरेः। शेषां च वैभवावस्थां शृणु देवि! यथाक्रममिति'। ऐश्वर्य्यद्योतकं सप्तमे-'मूर्द्ध्न बद्धांजलिपुटाः

आसीनं तीव्रतेजसम् । ईडिरे नरशार्दूलं नाति दूरचराः पृथगि'-त्यादिना परमैश्वर्य्यं । ऐश्वर्य्यद्वारा यशश्च सप्तमे-'सभासु सत्रेषु तवामलं यशो गीत्वा सपर्यां महतीं लभामहे । यस्तांऽयनैषीद्वशमेष दुर्जनो दिष्ट्या हतस्ते भगवन यथामयः' । एवमन्यदपि । अथ परशुरामः ऐश्वर्य्यप्राधान्येन धर्मश्रीयशो वैराग्यादिकं नवमे-'एवं भृगुषु विश्वात्मा भगवान् हरिरीश्वरः । अवतीर्य्य परं भारं भुवोऽहन् वहुशो नृपान् । यशः-'ददौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिश' मित्यादि 'जामदग्न्योपि भगवान् रामः कमललोचन इत्यादौ' श्रीः । आगमिन्यंतरे राजन् वर्त्तयिष्यति वै बृहदितिधर्मः, न्यस्तदण्डः प्रशांतात्मेत्यादौ वैराग्यं । अथ कल्की ऐश्वर्य्यद्योतकं-'अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु । भविता विष्णुयशसो नाम्ना कल्किर्जगत्पतिरिति' अष्टैश्वर्य्यसमन्वित इति द्वादशे धर्मद्योतकमाह-अथ तेषां भविष्यन्ति मनांसि विशदानि वै' इत्यादि । अथ पुरुषावतारः ऐश्वर्य्यद्योतकमाह-तमाहुराद्यं पुरुषं सहस्रांघ्र्यूरुवाहुकमित्यादि । इति चत्वार ऐश्वर्य्यावताराः । 'नारदोऽथ तथा व्यासो वाराहो बुद्ध एव च । धर्मप्रधाना एवैते धर्मद्वारान्यगामिन्यः' । धर्मद्योतकं प्रथमे-उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्त किल्विषः । एवं प्रवृत्तस्य विशुद्धचेतसः तद्धर्म एवात्म रुचिः प्रजायते । नैष्कर्म्यं कर्माणां यत इत्यादिकं तु भगवद्धर्मप्राधान्यनैव । अथ व्यासः धर्मद्योतकमाह-सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृगित्युक्त्वा चातुर्होत्रादिवेदविभागं कृतवान् इदं प्रोवाच धर्मविदिति च भारतादिना यश आदिकं प्रकटमेव । अथ वाराहः धर्मद्योतकमाह-'जितं जितं ते जितयज्ञभावन त्रयीतनुं त्वां परिधुन्वते नमः । यद्रोमगर्त्तेषु निलिल्युरध्वरास्तस्मैनमः कारणशूकरात्मने' । ऐश्वर्य्यादिकं धर्मप्राधान्यनैव । अथ बुद्धः धर्मद्योतकं एका-

दशे-'वादै र्विमोक्ष्यति यज्ञकृते तदर्हान्' इति धर्मावतारः। रामो धन्वन्तरिर्यज्ञः पृथुः कीर्त्ति प्रधानुगाः । यशः प्राधान्यं श्रीदशमे-'यस्येव दुष्कलित रोषकटाक्षमोक्षैर्वर्त्मा-दिशत् क्षुभितनक्रतिमिंगिलोऽब्धिः । सेतुः कृतः स्वयश उज्ज्वलिता च लंका रक्षः शिरांसि भुवि ये तु रिपुक्षतानि' । यशः प्रधान्येन धर्ममाह-'यः सत्यपाशपरिवीत पितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः । राज्यं श्रियं प्रणयिनः सुहृदो निवासं त्यक्त्वा ययौ वनमसूनिव मुक्तसंग' इति नवमे । अथ धन्वन्तरिः यशः प्राधन्यं द्वितीये-'धन्वन्तरिश्च भगवान् स्वयमेव कीर्त्तिनाम्ना नृणां प्ररुदतां रुज आशु हन्ति' । धर्मादयोपि ज्ञेयाः । अथ यज्ञः यशः प्राधान्यं द्वितीये-सयामाद्यैः सुरगणैरपात्स्वायंभुवान्तरमिति, यशो द्वारा श्री चतुर्थे-आनिन्ये स्वगृहं पुत्र्या पुत्रं विततरोचिषं । अथ पृथुः यशः प्राधान्यं चतुर्थे-'अयं तु प्रथमो राज्ञां पुमान् प्रथयिता यशः । पृथुकीर्त्तिर्महाराजो भविष्यति पृथुश्रवाः'। यशो द्वारा धर्ममाह-एष धर्मभृतां श्रेष्ठो लोकं धर्मेऽनुवर्त्तयन् । यशो द्वारा ऐश्वर्य्यमाह-एष दोग्धा महीं वीरो गां सती मोजसोषधीः इति यशोऽवताराः कृष्णरामौ मोहनी च वामनः श्रीप्रधानुगाः पाद्मे-एतत्ते सर्वमाख्यातं वामनं वैभवं हरेः। श्रीप्राधान्यं रामकृष्णयोर्यथा-'अक्षण्वतां फलमिदं न परं विदामः सख्यः पशूननुविवेशयतोर्वयस्यैः। वक्त्रं व्रजेशसुतयोरनुवेणुजुष्टं यै र्वा निपीतमनुरक्तकटाक्षमोक्षम्'। गुणेनैवावतारत्वं न तु स्वरूपतः अतएव सजातीयोत्कर्षेणोक्तं वृष्णीनां वासुदेवोऽस्मीति । अथ मोहनी श्रीप्राधान्यमष्टमे-अहो रूपमहो धाम अहो अस्या नवं वय इत्यादि । अथ वामनः श्रीप्राधान्यमाह-रूपानुरूपावयवं दर्शनीयं मनोरमं । ज्यायान् गुणैरित्यादि श्रीद्वारा ऐश्वर्य्यं इति यशोऽवताराः। दत्तात्रेयश्च मत्स्यश्च

कुमारः कपिलस्तथा। ज्ञानप्रधानविज्ञेया ज्ञानान्ये गौणतां गताः। कुमारः ज्ञानप्रधानकः सर्वत्र ते बिषमया इत्यादि। कपिलः यथा कपिलस्तत्वसंख्यातेत्यादि दत्तात्रेयः आन्वीक्षिकीमलर्काय प्रल्हादादिभ्य ऊचिवानित्यादि। मत्स्यः आत्मतत्वमसंशयमित्यादि इति ज्ञानावतारा:। नारायणो नरश्चापि कूर्मश्चाप्यर्षभस्तथा। वैराग्यरूपा विज्ञेयास्तत्तत्कर्मानुसारतः। पाद्मे-यत्कौर्म्यं वैभवं विष्णोः सर्वलोकनमस्कृतमिति। नरनारायणयोर्यथा देव्यस्त्वनंगप्रतना घटितुं न शेकुः। कूर्मः निद्राक्षणोद्रिपरिवर्तकघाणकंडूः। नहि वैराग्यं बिना एतादृशे स्थले सुखं, ऋषभः-यो वै चचार समदृक् जडयोगचर्य्यां इति वैराग्याबतारा: एवमन्येपि कार्य्यानुसारेण ज्ञेया:। एवमवतारावतारिभावः सिद्धस्तथेश्वर एक एवाकारभेदस्तु तत्रैव किंच नास्माकमाग्रहः, गुणैर्यत्ये वैभवावस्थरूपस्य श्रूयमाणत्वात् गुरूपदेशशास्त्राभ्यां विवृत्तमस्माभिः अन्यच्च वेदान्तन्यायादिभिरपि स्वीकृतत्वात्। मत्स्याद्याकाराणां प्रामाण्यं उपासना च परंतु मायिकत्वेऽनित्यत्वे पांचभौतिकत्वे च अदृष्टजन्यत्वादौ विप्रतिपत्तिः तत्त् यथा स्थाने विवृतं उक्तं च पाद्मे-'परावस्था परेशस्य व्यूहाश्च विभवादयः। उक्ता देवावताराश्च बिष्वाकारादिका: स्मृता:। अर्च्याबतारव्यादेश्याः वैभवाः परमात्मन इति'।

आत्मा सर्वोत्तमस्यैव व्यापकत्वेन संमतः।
शरीरं तु परिछिन्नमचिन्त्यानंतशक्तिकम् ॥
आत्मा निर्गुण एव स्याद्गुसरूपस्तु बिग्रहः।
बिग्रहछिन्न एवात्मा पुरुषोत्तम ईरितः ॥
इन्द्रियादेस्तु राहित्यं केवलात्मनि युज्यते।
बिभागोऽयं द्विधा ज्ञेयः शरीरे च तथात्मनि ॥
कामद्वेषादयो दोषा नात्मन्येव बिशंति ते।

पुरुषोत्तमे निशिद्धाश्चेदंशगा एव संमताः ॥
नहि कुत्रापि कृष्णस्य भयहेतोरुपेक्षणम् ।
न शरीरं बिना क्वापि भीहेतोर्मरणं स्मृतम् ॥
निषेधः प्राकृतैर्ज्ञेयो बिधिस्त्वप्राकृतैर्मतः ।
यथा योगीश्वरो देही स्वशरीरेषु संस्थितः ॥
एवमेवावतारी तु सर्वगाभिन्नया मतः ।
अन्यथा ह्यवतारेषु भेदाभेदः कथं भवेत् ॥
यथाकाशो द्विधा भिन्नः तथा कृष्णे प्रतीयताम् ।
मूर्त्तिमांश्च परिछिन्नः व्यापको मूर्त इष्यते ॥
तथा बिग्रहवानात्मा पुरुषोत्तम ईरितः ।
तत्तद्विग्रहवानात्मा ग्रवतार इति स्मृतः ॥
आत्मैकत्वेन चैकात्म्यं बिग्रहाद्भिन्नता स्मृता ।
पुरुषोत्तमवाच्यस्तु ह्येक एव मतो बुधैः ॥
योगजातेन धर्मेण कायव्यूहं करोति चेत् ।
न शरीरेष्वभेदः स्यान्न योगो व्यूहगो भवेत् ॥
अवतारेषु सर्वेषु तारतम्यं सुनिश्चलम् ।
नभगस्य बिभेदोऽस्ति नात्मनश्चेति निश्चयः ॥

'बिज्ञानादिभावे वा तदप्रतिषेधः' इत्यधिकरणेन सर्वावतारेषु सर्वज्ञत्वादिसाधितमनेकत्वं भाष्यकारेण बिवृतं । सर्व एते वासुदेव-प्रद्युम्ननिरुद्धसंकर्षणाः आत्मानः भगवंतः वासुदेवा एव । बिज्ञानैश्वर्य्यबलवीर्य्यतेजोभिरीश्वरगुणैरन्विताः इति । तदभिप्रायेण मया बिवृतं सूत्रार्थस्तु-बिज्ञानादिभावे ऐश्वर्य्य-सत्वेऽपि चतुर्व्यूहे उत्पत्तिनिषेधकप्रमाणस्य अप्रतिषेधः निराकरणं न उत्पत्तिर्नास्तीत्यर्थः । केचनोत्पत्तिं चतुर्व्यूहेषु मन्यंते । तन्निषेधकं सूत्रं तेषां नित्यत्वात् तथा सति पुत्रकलत्र-सप्तऋषि भार्यादिषु संबंधो न स्यात् । तस्माच्छ्रीकृष्णः सर्वेश्वरावधिः

रसरूपश्च। अवतारेषु तरतमभावः तदुक्तं तृतीये-आसीनमूर्व्यां भगवन्तमाद्यं संकर्षणं देवमकुंठ-सत्वम्। विवित्सवस्तत्वमतः परस्य कुमारमुख्या मुनयोऽन्वपृच्छन्। स्वमेव धिष्ण्यं बहुमानयन्तं यद्वासुदेवाभिधमामनन्ति इत्यादौ परत्वं श्रूयते। यत्र कुत्रचिदवतारत्वं तत्रावतारकार्यकर्तृत्वेनावतारत्वं। तथा बिभूतिमध्ये वृष्णीनां वासुदेवोऽस्मि इति। अतः श्रीकृष्णे चातुर्विध्यं, अवतारिकार्यकर्तृत्वादवतारीत्वं, भूभारादिहरणकर्तृत्वादवतारत्वं, विभूतित्वं च सजातीयोत्कर्षात्। विलासैकस्वभावत्वात्रतयातीतत्वं। तथाहि-बभौ भूः पक्वशस्याढ्या कलाभ्यां नितरां हरेः। तथा ताविमा वै भगवतो हरेरंशाविहागतौ। भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहाविति। नरनारायणावृषीति च त्वरये नमंति मे इति च। रामानन्दवनैस्तु व्याख्यातं आभ्यां कला भूः वभौ, यद्वा कलाभ्यां शोभाभ्यां गौरश्यामलक्षणाभ्यां, यद्वा हरेः हरिसंज्ञावतारात् कलाभ्यामधिकाभ्यां कला स्यान्मूलरै वृद्धाविति कोषात् इति। कृष्णौ कृष्णार्जुनौ प्रति नरनारायणौ प्राप्ताविरयर्थः। अन्यथा यदि महाकालस्यं तो अंशौ भविष्येतां तर्हि दूरतोऽपि अवलोकनं स्यात्। युवयोर्दिदृक्षुणेति दिदृक्षा न घटते। अर्जुनस्य प्रताडितात्वं वैकुंठागताश्वानां चाभिभव इत्यादिका भगवल्लीला यथा जरासंधात्पलायनं। महाकालस्य लोकपालेषु वैभवज्ञापनाय ज्ञातव्यम्। यथा रूद्रे स्तुतिप्रणामादि, यथा श्रीगोवर्द्धनाचले। तस्मै नमो व्रजजनैः सह चक्रेऽत्मनाऽत्मने इत्यादिना गोपान् विस्मापयन् नमनादि चक्रे तथार्जुनमपि। ततोऽर्जुनस्य विस्मये सत्यपि श्रीकृष्णस्यैव वैभवं ज्ञातं। न तु महाकालस्य। यत्किंचित्पौरूषं पुंसां मन्ये कृष्णानुकम्पितमिति। हरिवंशे तु स्पष्टमेवोक्तम्। मद्दर्शनार्थं ते बाला हृतास्तेन महात्मना। विप्रार्थमेष्यते कृष्णो नागच्छेदन्यथेतिहेति। पुनस्तत्रैव-व्रह्मतेजोमयं दिव्यं महद्यद्दष्टवानसि। अहं स भारतश्रेष्ठ

मत्तेजस्तत्सनातनमिति अर्जुनं प्रत्युक्तम् । उज्जहारात्मनः केशौ सितकृष्णौ महामुने इति । भारते च-स चापि केशौ हरि रुद्ववर्हे शुक्लमेकमपरं चापि कृष्णं । तौ चापि केशावाविशतां यदूनां कुले स्त्रियौ रोहिणीं देवकीं चेत्यादि वाक्यानां भूभारहरणकार्यस्यैषत्क-रत्वज्ञापनायाविर्कृतत्वात् । किंच श्रीकृष्णेऽवतारित्वमवतारत्वं विभूतित्वं च सर्वकार्यदर्शनात्तदुक्तमेव । किंच तत् सर्वं प्रवृत्ति-मार्गाविकृतत्वात् बाध्यं । श्रीभागवतस्य सर्वोपमर्दकत्वात् बाधक-त्वमेव । तदुक्तं नारदेन-युगुप्सितं धर्मकृतेऽनुशासनः स्वभावर-क्तस्य महान् व्यतिक्रमः । यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जन इत्यादिना श्रीव्यासेनापि बाध्यत्वमुक्तम् । किंवा भागवता धर्मा न प्रायेण निरूपिता इति । अन्यथोभयवा-क्ययोः व्यासकर्तृकत्वेन विरोधः कथं स्यात् । तत एवं ज्ञायते । भारताद्युक्तिश्चाभक्तदशायां श्रीनारदोपदेशानन्तरं भक्तदशायां श्री-भागवतोक्तिरिति । ततः श्रीभागवतस्य सर्वोपमर्दकत्वं यथार्थ-त्वात् । यथा श्रीकृष्णस्वरूपं तथा तन्नाम्नि ज्ञेयम् । अन्यथा कूर्म्मेत्युक्ते नृसिंहस्वरूपोपस्थितिः स्यात् । यथा श्रीकृष्णस्वरूपे वैलक्षण्यं तथैव कृष्णनाम्नि ज्ञेयम् ।

पुरुषोत्तमस्य केचिदंशाः केचित् कला मताः ।
विभूतिश्चाप्यनेनैव त्रिभेदी शिष्टसंमताः ।
अन्यात्मनो प्रवेशेन ह्यवतारेषु चांशता ।
शक्त्यान्यात्मप्रवेशस्तु कलात्वमभिधीयते ।
सजातीयेषु चोत्कर्षो यत्र सा भूतिरिष्यते ।
एके ऽवतारानियता लोकसेवकसंयुताः ।
अपरेऽनियतस्थानसेवकाः शास्त्रसंमताः ।
यल्लोकाः सेवकाश्चैव श्रूयन्ते तत्तथैवहि ।
मन्वन्तरावताराणां मूलेनैव स्थितिर्मता ।

यथा गंगाजलं क्वापि हिमतोयमयं भवेत् ।
हिमाभावे द्रवत्वाच्च गंगारूपेण तिष्ठति' ॥

शक्तयाविष्टास्त्वीश्वरत्वेन नोपास्याः । तदुक्तं पाद्मेनोपास्यं हि भवेत्तस्माच्छक्तयावेशान्महात्मन ' इति ।

'एतन्नानावताराणां निधानं बीजमव्ययं ।
इत्यादिवाक्यप्रमाण्यात् स्वं मनोऽहं समादधे ।
वृन्दावने तु यद्दृष्टं ब्रह्मणा तत्तथैवहि ।

किंच येतु व्यापकं शरीरं मन्यंते तैरपि परिच्छिन्नं स्वीकरणीयम् । सिद्धे साधके च तस्यावश्यकत्वात् तथा धर्मधर्म्मिनोश्चावश्यकत्वात् नित्यत्वाच्च श्रुतिस्मृतिपुराणोपदेशैः रमितव्यं भक्तिरसेनेति ॥

इतिश्रीनारायणभट्टविरचिते भक्तभूषणसन्दर्भे ईश्वररत्नमणिमालागुम्फनः ( ऐश्वराख्यमणिमालागुंफः ) प्रथमः परिच्छेदः ॥२८

## अथ भक्तपरिच्छेदः

'अवतारावतारित्वमीशे द्वैविध्यमीरितं । जीवभक्ततयात्मापि द्विविधः परिकीर्त्यते' । आत्मा द्विविधः जीवो भक्तश्च । स आत्मा विचार्य्यते । तत्र केचिद्ब्रह्माभिन्न एव घटाकाशवत् । तत्रापि केचिदेके ह्युपाधित्वादेक एव जीवो ब्रह्माभिन्न,ः सांख्याः कूटस्थो व्यापकश्चेति नैयायिकाः अदृष्टादिगुणवान् व्यापक इति । तत्र केचित्प्रतिबिम्बमिति । तन्निरूपयितुमशक्यत्वात्तथाहि नहि निर्धर्मकनिराकारस्य ब्रह्मणः प्रतिविम्बः संभवति अपरिच्छिन्नत्वात् । किंचोपाधिर्सर्वात्मना व्याप्नोति ? ब्रह्मणि वा ? आद्ये प्रतिविम्वासंभवोऽभिन्नत्वाद्द्वितीये ब्रह्मत्वव्याघातः, प्रतिविम्वस्य जड़त्वेन सुखदुःखधर्म्मादयभावेन नियोज्याभावाद्वेदप्रयुक्तविधिनिषेधव्यर्थता स्यात् । तदुक्तं भास्करेण-"प्रतिबिम्बस्य जीवस्यावस्तुत्वमिति' । तस्माज्जीवो वस्तुभूतः । उपहसितं भाष्यकारेण

द्वितीयचरणे-'नान्योतोऽस्ति द्रष्टेनि श्रुतेर्वचनसुभगा ? वचनमिवाभेदे आदरणीयं त्वया। य आत्मनि तिष्ठन्निति भेदं प्रतिपादयन्त्याः श्रुतेर्वचनं किमिति न श्रूयत इति। उक्तं च रामानुजैः तोयाधारेषु दोषाकर इव बहुषूपाधिषु ब्रह्म शुद्धं च्छायापन्नं विशेषाद्भवति तनुभृतस्तत्प्रतिच्छंदभूताः इत्यप्यत्यंतदुस्थं प्रसजति च तदा जीवनाशोऽपवर्गः च्छायाछायवदैक्यं न भवति न च तद्दर्शनं ब्रह्मणास्ते' इति। अभिज्ञास्तु अणुर्व्याप्यशीलः प्रसृतचैतन्यवान् दीपवत् तत्र भिन्नरूपः सनातनः इत्यादि वाक्यबलान्नरकस्वर्गादि भोगवैचित्र्याऽन्यथानुपपत्या परिदृश्यमाना सर्वात्मभ्रांत्येश्वरस्याभ्रांतत्वान्यथानुपपत्या। तदुक्तं वेदस्य प्रामाण्यात् तत्प्रतिपाद्यभेदस्याबाधितत्वात् भिन्न एव जीवः। कंठोक्तं भास्करभाष्यकारेण द्वितीयचरणे। तदेवं चतुर्भिः सूत्रै जीवेश्वरयोर्भेदः प्रतिपादितो न्यायोपपन्नश्चेति। सूत्राणि तु-अनुपपत्तेश्च नाशरोरः, कर्मकर्त्तृव्यपदेशाच्च, शब्दविशेषाच्च, स्मृतेश्च इति। तृतीयचरणे च स्थित्यदनाभ्यां चैतस्मिन् सूत्रे सूत्रकारो जीवपरयोर्वास्तवभेदमुपगम्य जीवनिराकरणं चकार। अपरे श्रुत्यर्थमब्रुवानाः भेदं मायामात्रं संगिरंते इत्यपि कंठोक्तं, भिन्नत्वे ईश्वरः सर्वज्ञो भ्रान्तिरहितः सर्वहितकर्त्ता। तदुक्तं-वेदप्रामाण्यात् तत्प्रतिपाद्यानुष्ठानेन भ्रान्तजीवस्य भ्रमनिवृत्त्या कृतार्थत्वं, तत्प्रतिपाद्यानुष्ठानेन भ्रान्तजीवस्य नरकादिव्यवस्था समंजसा। अन्यथा नास्तिकतायां पर्य्यवसानं स्यात्। तस्माद्भिन्ना जीवाः। तथा सर्वोपनिषदि'अथर्वांगिरास्त्रिविधः पुरुषः। तद्यथा वाह्यात्मान्तरात्मा-परमात्मा चेति। त्वक्चर्म-मांसादि इत्येव वाह्यात्मा नाम। अथान्तरात्मा नाम श्रोता-घ्राता-रसयिता-मंता-बोद्धा कर्त्ता-कर्मविशेषं करोत्येषोऽन्तरात्मा नाम। अथ परमात्मा नाम साक्षीभूतः शुद्धः सर्वव्यापी अचिन्त्यः अशुद्धान् पुनाति इत्येष

परमात्मा पुरुषो नामेति भिन्नत्वेन प्रतिपादितः कर्मकर्त्तृव्यपदेशाच्च कर्मत्वेनोपासना विषयत्वेनेश्वर उक्तः कर्त्तृत्वेनोपासकत्वेन जीव उक्तः । अथ उभयव्यपदेशाद्भेदः तथैव श्रीभाष्यकारैरुक्तं-गुहां प्रविष्टावात्मानौ तद्दर्शनात् अस्मिन्नधिकरणे-'तदेवं श्रुति सूत्रकारौ जीवपरयोर्वास्तवं भेदं दर्शयन्तः' ॥१॥

केचित्तु श्रुत्यर्थमेवाचार्योक्तिं च पृष्ठतः कृत्वा मायामात्रं स्वबुद्धया कल्पयन्ति इति कंठोक्ति र्ज्ञेया । एक जीवपक्षेऽपि नास्तिकतामेवानयति, कूटस्थपक्षेऽपि ज्ञानाश्रये ज्ञानस्वरूपे वा प्रवृत्तिनिवृत्त्यभावात् जड़तुल्यता स्यात् वेदव्यर्थता च । परतंत्र्या भावात् । नैयायिकपक्षेऽपि गत्यागत्यादिवाक्यानां बाधप्रसंगात् ( बाधस्या प्रसंगात् ) । किं च व्यापकत्वे युगपद्देहोत्पत्तिः स्याद्दृष्टस्य ( विद्यमानत्वात् अपेक्षणीयाभावात् । देहसंचारश्च स्यात् सर्वात्मनां सर्वदेहेषु विद्यमानत्वात् ) तद्दृष्टोपगृहीतताभावत्वं च बालप्रतारणमात्रं, अन्यथा योषिच्छरीरादिना पुरुषस्य भोगो न स्यात् । किं च कस्यचिद्भोगः कस्यचिन्नेति व्यवस्थान्यथानुपपत्या पतिपुत्राद्यदृष्टजन्यत्वं स्वीकरणीयं, दृश्यते च कस्यचिच्छरीरेण बहूनां दुःखं सुखं च । तस्मान्न जीवो व्यापकः ईश्वरस्तु व्यापकः नियन्तृत्वात् नियम्यत्वाद्व्याप्यः । भवतु यथा तथा जीवस्तु भिन्न एव तथैतत् श्रीभास्करभाष्यकारैः षट्शास्त्रमतानुगैर्वेदान्तैकदेशिमतमत्यन्ताभेदः निराकृतः अनवस्थितेरिति काशकृष्नः अस्मिन् सूत्रे ॥२॥

तथाहि केचिन्मायावादिनः ईश्वर एव देहे प्रविश्य संसारी नान्यतोऽस्ति द्रष्टेति श्रुतेरितिब्रुवते । तत्र ब्रूमः 'संसारितां कथं कुर्यादात्मनि ( दात्मानं ) स्वयमिच्छया । स्वयं निर्मितमायात्मा वेदान्तश्रवणादिना । ज्ञानं प्राप्नोति मुक्त्यर्थं सर्वज्ञ इति कः क्रम' इति याष्कोक्तिः । उपनिषदि-ऋतं पिबन्तौ सुकृतस्य लोके गुहां

प्रविष्टौ परमेऽपरार्द्धे इति। स्मृतिश्च - द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते। उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः इति। द्वासुपर्णा सयुजासखाया समानं वृक्षं परिसस्वजाते। तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नन्यो भिचाकसीत्यादि श्रुतिप्रामाण्याद्भिन्नः। तथा प्रथमाध्यायद्वितीयचरणे-स्मृतेश्च, स्मृतर्हेतोर्जीवा भिन्नः, स्मृतिरन्तर्यामिस्मृतिः, ततः जीवब्रह्मणोर्भेदः। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति इत्यादिना ॥३॥

इदमत्र तत्वं नैसर्गिकोऽनादिसिद्धः सर्वोऽपि भेदो नित्य एव, तथा जड़चैतन्ययोः, सेव्यसेवकत्वेन लक्ष्मीनारायणयो भेदः,यः क्षादिरारोपितः सो नित्यः यथाहं ब्राह्मणः अहं दुःखी स्थूल इत्यादि भेदोऽनित्यः स ज्ञानेन भक्त्या वा निवर्त्तते चेतनेष्वारोपितं ब्राह्मणत्वादिकं तत्वमसि- ब्रह्माहमस्मीत्याद्युपासनया निवर्त्तते। न तु जड़चैतन्ययो नित्यासिद्धो भेदः तदुक्तं शास्त्रयोनित्वादित्यधिकरणे भाष्यकारेण-कल्पितमारोपितं भेदमाश्रित्य तत्वमस्यादिवाक्यानां प्रवृत्तिः तन्निवृत्तये यथा कश्चिद्राजपुत्रो बालः-भिल्लैर्जातोऽहं भिल्लः तं यथा कश्चिदारोपितं भिल्लाचारं दूरीकर्त्तुमुपदिशति त्वं राजपुत्रोऽसि न भिल्लः इति ग्राहिते तत्वे सो भिल्लाचारं हित्वा स्वरूपं प्रतिपद्यते राजपुत्रोऽहं न भिल्लः इति कंठोक्तं तथा प्रकृते ज्ञानेन चैतन्यघनोऽहं न ब्राह्मणादिः भक्त्या दासोऽस्मीति ज्ञेयम्। भारते-'यथा पक्षी च ( सूत्रं च ) पक्षश्च नानावृक्षरसो यथा। यथा नद्यः समुद्रश्च शुद्धोदलवणौ यथा। यथाचौरापहार्यौ च यथा पुंविषयावपि। तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ' ॥४॥

ननु जीवस्याणुत्वे देहेन्द्रियव्यापि चैतन्यं सर्वावयवावच्छेदे सुखं दुःखं वा चैतन्यं न स्यात्। अनुमानं च आत्मातीन्द्रियः

अणुत्वात् परमाणुवत् तत्र सुखादिकमपि प्रत्यक्षं न स्यात्। किंच कार्य्यान्यथानुपपत्या परमाणुः कल्पयते। नहि प्रकृते किमप्यात्मोपादेयमस्ति तस्मात् तद्व्यापक इति च तत्र ब्रूमः सर्वप्रमाणगम्यत्वादणुत्वेन विरोधिता, विरोधाभासतायां ते भासते न विरोधिता (विरोधाभास आयातेर्भासते न विरोधिता) तथाहि अणुत्वेनातीन्द्रियत्वेन साध्ये इष्टापत्तिः न ह्यतीन्द्रियत्वेऽणुत्वे प्रयोजक मपि तु महत्त्वे सत्युद्भूतरूपवत्त्वाभावः। न चेदं वहिरिन्द्रिये प्रयोज्यप्रयोजकमणुत्वं सर्वेन्द्रियाग्राह्ये प्रयोजकमिति वाच्यं, परमाणूनां योगे प्रत्यक्षत्वात् किं चातीन्द्रियत्वे साध्ये हेत्वव च्छिन्नजडत्वमुपधिः नच पक्षे पक्षेतरत्वे योगीश्वरयोर्वारणीयत्वात्। यद्वा श्रुतिस्मृतिपुराणादिनाणुत्वे सिद्धे अप्रयोजकत्वाद्धेतोः पक्षेतरत्वमेवोपाधि र्भवतु भवतु वा यथा तथांतरेन्द्रिया ग्राह्यमेवेति भवता पाद्यते। तत्तु न संभवति। तथाहि उपदेशपरम्पराप्राप्तेन्द्रियशब्दार्थे निर्णीतेन्द्रियपदार्थसंनिकर्ष जन्यज्ञानविषयत्वमेव प्रत्यक्षतायां प्रस्तुतायां प्रयोजकं तदभावेः प्रत्यक्षतायामिति ( प्रतीक्षतामिति ) अन्यथा लौकिकालौकिकयो र्वहिरन्तरयोः षट् पदार्थेषु चाभावेषुच प्रत्येक्षाप्रत्यक्षयोरनेककल्पना स्यात्। नच तत्वे आकाशश्चाक्षुषः स्यादिति वाच्यं, विशेषसामग्र्यभावात्तचोक्तं कार्योपादेयतयाणुत्वं कल्प्यत इति। तत्रामुष्यैव व्यभिचारात् किं च श्रुतितर्काणां विरोधे श्रुतेर्वरिष्ठत्वं प्रमाणानां वलवत्वे श्रुतेः संकोचः न तु वाधः प्रमाणानां समवलत्वे प्रमाणानां संकोचः। सूत्रकारेणाप्युक्तम् द्वितीयाध्यायतृतीयचरणे स्वशब्दोन्मानाभ्यां च स्वशब्दात् जीवशब्दात अणुरात्मा चेतसावेदितव्यः अतः जीवः अणुः, उद्धृत्यामानं उन्मानं तस्मादप्यणुः 'वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवस्य विज्ञेयः स चानन्त्याय कल्पते'। 'आराग्र-

मात्रोप्यबरेपि दृष्टः' श्रुतिः, 'सूर्य्यद्वारेण विरजाः प्रयान्ति'। न च (तच्च) मनोवासनाबन्धविशिष्टाभिप्रायं मतान्तरे लिंगशरीराभिप्रायं चेति वाच्यं श्रुत्यन्तरविरोधात्, प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। आत्मशब्दस्य कंठोक्तत्वात् न ह्यपरिच्छिन्नः शरीरो भवति। स्वात्मनाचोत्तरयोरिति न्यायाच्च। उत्तरयोः गत्यागत्यो आत्मना स्वरूपेणैव न तु मनसा लिंगशरीरेण वा इति भाष्योक्तिः, व्यापकत्वे मार्गोक्तिवैयर्थ्यं स्यात्। तथा श्रुतिः 'शतं चैका हृदयस्य नाड्यस्यासां मूर्द्धानमभिश्रितैका तयोर्द्ध्वं गत्या यदमृतत्वमेति विष्वक् गत्या उत्क्रमणो भवन्तीति'। किं च पुराणागमयोः धूमार्चिमार्गश्रवणादणुरात्मा, एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पंचधा विवेशेति मण्डूकोपनिषदि। नहि चेतसा बोधने किंचिद्बाधकं प्रमाणमस्ति अणुत्वे तु बहिरिन्द्रिये तदपि लौकिके व्यापकत्वमपि चेतसो ग्रहणेऽप्रयोजकत्वादाकाशवद् ग्रहणं च स्यात्। आत्मनस्तद्गुणानां च ग्रहणेनैव चेतसः सिद्धेः ते चान्द्रमसमेव लोकमभिजायते तदेव पुनरावर्त्तते इति प्रश्नोपनिषदि। नहि गमनागमनेऽन्यत् कल्पकं प्रमाणमस्ति। इन्द्रियवासना प्राणैरदृष्टविशेषोपगृहीतमनः कल्पत इति श्रुतिविरोधः। स यदास्माच्छरीरादुत्क्रामति सहैवेति सर्वैरुत्क्रामति ये के चास्माल्लोकान् प्रयांति चन्द्रमसमेव ते सर्वे गच्छन्तीति समूहकल्पने तैः सर्वैः सहेति न स्यात्। श्रुत्यन्तरे च-आराग्रमात्रो ह्यवरोपि दृष्ट इति। 'वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीव स विज्ञेयः स चानन्त्याय कल्पते'। न चाणुत्वे देहव्यापिसुखदुःखचैतन्यं न स्यात् यत्किंचिदेतत् तप्ततैलचन्दनविन्दुवत् दीपसूर्य्यप्रभावत् अणुत्वेऽपि चैतन्यस्य प्रसरणस्वभावत्वात् द्रव्याधिकदेशवृत्तित्वाच्छितगंधयोरिव अन्यथा पुष्पछिद्रत्वं न स्यात् अविरोधश्चन्दनविन्दुवत् इति न्यायादणुरात्मा द्विती-

याध्यायतृतीयचरणे—ननु जीवस्याणुत्वे कथं विश्लेषोऽपि चैतन्यं सुखं वा तत्राह अविरोधः जीवस्याणुत्वे सुखचैतन्ययोः सर्वदेहव्यापित्वे न विरोधः। ननु गुणस्य कथमधिकदेशवर्त्तित्वं तत्र दृष्टान्तेन साधयति चन्दनविन्दुवत्। यथा चन्दनविन्दुरेकदेशे गृहे, तैले वा स्थितः शीतो गुणः सर्वव्यापी तद्वदित्यर्थः। तदुक्तं ब्रह्माण्डे-यथा व्याप्य शरीराणि हरिचन्दनविप्रुषः इति। पाद्मोत्तरखण्डे द्वात्रिंशाध्याये-ज्ञानाश्रयो ज्ञानगुणश्चेतनः प्रकृतेः परः। अणुर्नित्यो व्याप्य शीलश्चिदानन्दात्मकस्तथा। अहमर्थोऽव्ययः क्षेत्री भिन्नरूपः सनातनः' इति कंठोक्तेः। विष्णुधर्म्मोत्तरे-वालाग्रशतशो भागः कल्पितस्तु सहस्रधा। तस्यापि शतशो भागो जीव इत्यभिधीयते'। सूक्ष्माणामप्यहं जीव इति भगवदुक्तिः तथा अथर्वसर्वशिखोपनिषदि-स एष इत्यूर्द्ध मुत्क्रामयतीत्याकारः। इति स्थानविशेषनियमाच्चिद्व्यापकः। अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति नाभि-हृदय-कंठ-मूर्द्धेति ब्रह्मोपनिषदि। अंगुष्ठमात्रः पुरुषः इति वल्गूकोपनिषदि। वालाग्रशतसहस्रविकल्पादिभि र्न लभ्यते इत्यात्मोपनिषदि। तस्मादात्माणुः देहप्रसृतचैतन्यवान् घटगृहदीपवत्। अदृष्टविशेषेण महदल्पचैतन्यवान् मूर्खपण्डितवत् खादिनिमित्तावछिन्नसर्वदेहव्याप्यव्यापि भोगवान् सिद्धः भेदवांश्च त्रैविध्या विषयानां तु त्रिभेदी शिष्टसंमता विस्वस्मिन्। जीवेश्वरयो विभाग एव उक्तं च रामानुजैः भिन्ना जीवाः स्वतः स्युः प्रतिनियमतया धीस्मृतीच्छासुखादेश्चेतो भेदा व्यवस्था न तु भवति तथा देहवान् (देहगत्याद्यभेदात्) सांख्यभेदात् भिन्नान् नित्यांश्च जीवान् कथयति निगमः। तद्धि नोपाधिना स्यादित्यादिना ॥५॥

अथात्मा द्विविधः जीवो भक्तश्च भक्तिरहित आत्मा जीवः जीवस्य यद्गुणास्फुरणादीश्वरतादुःखित्वाज्ञत्व-संसारित्व-पापि-

त्व-नारकित्व-दुर्भगत्व--हीनत्व-वैराग्यराहित्यासामर्थ्याशुचित्व-निगु णत्व-जडत्वादयो भवन्ति, भगवदैश्वर्य्यास्फुरणात् लोभित्व-हीनत्व-भोगित्व-मोहत्व-कृपणत्वादेवनिष्ठत्व-चिन्तादयः, धर्मस्यास्फुरणात अविनयात्मश्लाघा-मात्सर्यहिंसा-धर्मराहित्य-रोगादयः, यशसोऽस्फुरणात् क्रोधित्व-कठोरत्व-क्रूरत्वानृतत्व-निंदकत्व-कलहादयः, श्रियोऽस्फुरणात् पराधीनतालस्यसापेक्षतार्त्तितृष्णादयः, ज्ञानास्फुरणात् अल्पज्ञत्वाशांतित्वाधैर्य्यसन्देहानैपुण्यभयादयः, वैराग्यास्फुरणात् कामित्व-वंचकत्व-दम्भाहंकारादयो जीवस्य ज्ञेयाः षड्गुणान्यतमास्फुरणाद्भवन्तीति तात्पर्य्यम् ॥६॥

वैराग्यादयोऽपि जीवे भक्ते च संभवन्ति, प्रकारभेदेन। मिथ्यात्वेन दुःखदत्वेन वा वैराग्यमभक्तस्य, भक्तस्य तु यत्र भक्तिरससम्बन्धशून्यता तत्र वैराग्यं 'परिग्रहोऽतिदुःखाये'त्यनुसंधानेन स्वाश्रमधर्मेण वा निःपरिग्रहताऽभक्तस्य। अयं परिग्रहः भगवद्धर्म्मविरोधीत्यनुसन्धानेन निःपरिग्रहता भक्तस्य, चतुष्टयफलोद्देशेन जितेन्द्रियताऽभक्तस्य भक्तिप्रतिबन्धकस्येन्द्रियस्य जयो भक्तस्य, चतुष्टयोद्देशेन वा वर्णाश्रमविधिना वा धर्मोऽभक्तस्य, फलोद्देशं विना दास्येन धर्मो भक्तस्य, धर्म्मोद्देशेन विधिना तीर्थाटनं जीवस्य, भगवत्सेवानिर्वाहकं पूर्त्तं भक्तस्य भक्तीतरफलोद्देशेन विधिना तीर्थाटनं जीवस्य, भक्त्यर्थं तीर्थाटनं भक्तस्य, विधिना दानं जीवस्य, भगवदौदार्यानुसंधानेन दान भक्तस्य, विधिना संन्यासो जीवस्य, भक्तिप्रतिबंधकानुसंधानेन संन्यासो भक्तस्य, अदृष्टोत्पादकानुसन्धानेन पूजाजपौ जीवस्य, तदनुसंधानं विना भक्तस्य, मोक्षोत्पादकसमाधिर्जीवस्य, फलरूपो भक्तस्य इत्यादयः ह्यूम अन्यदपि स्नानादिकम् ॥७॥

अथ भक्तः भक्तिमानात्मा भक्तः तस्य स्वरूपं पाद्मे-'भगवत्परतन्त्रोऽसौ तदायत्तात्मजीवनः। तस्मिन्न्यस्तभरः श्रीशे तत्क-

म्मैव समाचरेत्। परमात्महरेर्दासः स्यामहं तस्य सर्वदेति' । पाद्मे प्रकरणान्तरे 'महत्त्वबुद्धिर्भक्तेस्तु स्नेहपूर्वा विधीयते। तदैव व्यज्यते सम्यक् जीवरूपं सुखात्मकमिति। दासत्वादिना तदीयत्वाभिमानी भक्त इति तु सामान्यस्वरूपम्। श्रीवैष्णवा अपि-अकारार्थो विष्णुर्जगदुदयरक्षाप्रलयकृत्, मकारार्थो जीवस्तदुपकरणं वैष्णवमिदम्। उकारो नान्योऽहं नियमयति संबंधमुभयोरित्यादि भक्तिस्तु वक्ष्यमाणा ज्ञेया। ते भक्तास्तु देहेन्द्रियवत्वेनैवान्यथात्मत्वेन सर्वत्रानित्यात्वाभक्तत्वेन कथिताश्चेद् तदा वैकुण्ठ इति व्यर्थता स्यात्। पाद्मे-अन्यैः परिजनैर्नित्यै मुक्तैश्च परिसंवृताः। नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकस-इति उपासना सिद्धाश्च 'मंत्राष्टाक्षरसंसिद्धा भक्त्या षोडशरूपया। गत्वास्मिन् न निवर्त्तन्ते विष्णुना सह मोदंते। न दास्यं वै परेशस्य वंधनं परिकीर्त्तितम्। सर्ववंधननिर्मुक्ताः हरिदासाः निरामयाः'। श्रुतिश्च नित्यशरीरं कथयति 'तथा तां उ विश्रुतिः अश्व-इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य धृत्वा शरीरं-सकृतं ( शरीरमकृतं ) कृतात्मा ब्रह्मलोकमभिसंभवति' । श्रुत्यन्तरे 'न पश्यो मृत्युं पश्यति स स्वराट् भवति। तमेवं विद्वानमृत इह भवति'। इह शब्देन शरीरे एवेति विवक्षितम्। इत्यादिवाक्यै र्नित्यत्वम्। किंच भगवच्छरीरस्य नित्यत्वेनैव पार्षदलोकयोरपि नित्यत्वमन्यथेश्वरत्वं राजवत् स्यात्। तथा कृष्णोपनिषदि अष्टादशाक्षरमन्त्रमुक्त्वा 'यः सकृदुच्चरेत्तास्य नास्ति मृत्युः नान्यगतिरिति' । श्रीभागवते-'देहेन्द्रियासुहीनानां वैकुण्ठपुरवासिनाम्। देहसंवन्धसंवन्धमेतदाख्यातुमर्हसि'। प्राकृतदेहेन्द्रियासुहीनानामित्यर्थः। चिदानंदात्मकं देहेन्द्रियवत्त्वमिति हृदयं। तथा च प्रथमे-'प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्। आरब्धकर्मनिर्वाणो न्यपतत् पांचभौतिकमिति' अपांच-

भौतिकं कर्मणि नारब्धं चायाति । उक्तं चाभियुक्तैः 'चिन्मात्राणीन्द्रियाण्याहुर्मुक्तानामन्यदेवतेति' । किंच मुक्तिषु स्वर्गनरकसादृश्येन हेयत्वे उक्ते भजनस्य तु नित्यत्वेऽर्थापत्त्या च नित्यं देहेन्द्रियवत्त्वं सिध्यति । तदुक्तं पाद्मे-निर्वाणखण्डे-'गोपालाः मुनयः सर्वे वैकुण्ठानन्दमूर्त्तयः' इति । तथा च पाद्मे कार्त्तिकमाहात्म्ये-'एते हि यादवाः सर्वे मद्गणा एव भामिनि । सर्वदा मत्प्रियाः देवि ! मत्तुल्यगुणशालिनः' । किं च भक्तेर्नित्यत्वे तदधिकरणागमैर्भक्तानां नित्यविग्रहवत्त्वं सिद्धम् ॥८॥

इदानीं श्रीकृष्णरूपगुणभेदैर्भक्तभेदो विचार्य्यते । तत्र चतुर्विधोपासना श्रीकृष्णस्य चातुर्विध्यात् केचित् ब्रह्मोपासकाः केचित्परमात्मोपासकाः केचित् भगवदुपासकाः केचित् श्रीकृष्णस्य रूपोपासकाः तदुक्तं प्रथमे'वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते' इत्यत्र चातुर्विध्यमेवायाति । अथ चैकादशे–नारायणाभिधानस्य ब्रह्मणः परमात्मनः इति त्रयमुद्दिश्य लक्षणमुक्त्वा परमवेहीति चतुर्थमुक्तम् । त्रयाणां तु श्रीकृष्णे तादात्म्यं ज्ञेयं यथा अमृतात्मके चन्द्रे देवत्वं औषधिपतित्वं ग्रहत्वं चेति । ततश्चोपासकानां चतुर्णां भिन्नैव परिपाटी फलं च तत्र ब्रह्मोपासनादैक्यमग्नो विस्फुलिंगप्रवेशवत्, भक्त्या परमात्मोपासनेन सालोक्यादि, भगवदुपासनया शुद्धा भक्तिः श्रीकृष्णस्वरूपोपासनया सर्वरसाश्राविणी रसरूपाभक्तिरितिरुत्सर्गः ॥६॥

विश्वस्याधिष्ठानतया जाग्रदादिषु वहिश्च यत्सत्वेन स्थितमशरीरं तद्ब्रह्म, चेतनाचेतनप्रेरकः परमात्मा, यः सर्वकर्त्ताकर्त्तुमन्यथाकर्त्तुं समर्थः शरीरी स भगवान्, यस्त्रयाणामाश्रयभूतः सौन्दर्य्यादिविशिष्टशरीरवान् सः श्रीकृष्णः । तदुक्तमेकादशे'–स्थित्युद्भवप्रलयहेतुरहेतुरस्य यः स्वप्नजागरसुषुप्तिषु

सद्बहिश्च । देहेन्द्रियासुहृदयानि चरंति येन संजीवितानि तदवेहि परं नरेन्द्र' !। श्रुतिश्च 'तुरीयं पृथिव्यामन्तरो यमयति' 'सर्वस्य कर्त्ता सर्वस्य वशी सर्वस्येशानः'। 'रसो वै सः' रसं ह्येवायं लब्ध्वानन्दी भवतीति'। तथा श्रीगोपालोपनिषदि–ब्रह्मणः प्रश्न ईश्वरं प्रति कथं वा देवाः यजन्ति ब्रह्मा यजति विनायकाः यजंति रुद्राः यजन्ति द्वादशादित्याः प्रयजन्ति। उत्तरं–रुद्रेषु रौद्री ब्रह्मण्येवं ब्राह्मी देवेषु दैवीत्याद्युक्त्वा उपसंहारे विज्ञानघनानन्दघनस्य सच्चिदानन्दैकरसे भक्तियोगे तिष्ठति इति रसभक्तौ रसात्मिकेति तात्पर्य्यम् ॥१०॥

तत्र ब्रह्मोपासनया धृतराष्ट्रस्यैक्यं विस्फुलिंगस्य यथाग्नौ घटाकाशस्य महाकाशे श्रीकृष्णस्य किरणस्थानीये ब्रह्मणि लय एवैक्यं। श्रीकृष्णस्य भिन्नत्वात् तृतीयाकाशवत्। तदुक्तं प्रथमे-'विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तम्। ब्रह्मण्यात्मानमाधारे घटाम्बरमिवाम्बरे'। तथा गांधार्य्यादावपि ॥११॥

अथ परमात्मोपासकाः, भीष्मस्य परमात्मत्वेन श्रीकृष्ण उपास्यः। 'हृदिस्थं पूजयामास माययोपात्तविग्रहम्'। 'सर्वात्मनः सर्वदृशो ह्यद्वयस्यानहंकृतेः'। 'इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि।' व्यापकस्वरूपे एव रतिः, त्रिभुवनकमनं तमालवर्णमित्यादिभक्तानुग्रहार्थं तथोपसंहारः। 'तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानाम्। प्रतिदृशमिव नैकधार्कमेकं समधिगतोऽस्मि विधूतभेदमोहः'। परमात्मत्वेन स्फुरणात् युद्धादौ प्रवृत्तिरभक्तपक्षपातः द्रौपद्याद्युपेक्षा च। द्वादश-भक्तेषु तु धर्मप्रतिपादन मात्रे गणना, नतु रसप्रतिपादने। आस्वादने च फलविरोधात्। 'संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले। सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये' इति सामीप्यादिमुक्तिर्ज्ञेया ॥१२॥

केचित्तु क्षीरनीरवदैक्यमिच्छन्ति तथा च भेदोऽभेदश्च हंसेषु तथा कृतिदर्शनात् । ततश्च दुग्धजलयोर्द्रवत्वधर्मयोरेवाश्लेषो नतु धर्म्मिणोः श्रीकृष्णकृपया मुक्तानामपि पुरुषस्थानश्रवणात् शुकवत् तथा नवयोगीन्द्राः-"ततस्ते भगवद्रूपं विश्वं सदसदात्मकं । आत्मनो व्यतिरेकेण पश्यन्तो व्यचरन् महीम्" "आत्मविद्याविशारदाः" इति । आत्मोपासकानां भक्तिः परमात्मप्रापिका तथा श्रुतदेवः-"नाद्य नो दर्शनं प्राप्तः परं परमपुरुषः । यहीदं शक्तिभिः सृष्ट्वा प्रविष्टो ह्यात्ममायया" । तथा सनकादिजनकभरतदत्तात्रेयकर्दमकपिलदेवहूत्यादयः तेषां परमात्मोपासना ऐश्वर्य्याधिक्याच्च सार्ष्टिर्भवति, वैराग्याधिक्यात् सालोक्यं ज्ञानाधिक्यात् सारूप्यं, धर्माधिक्यात्सामीप्यं, श्रियः यशस आधिक्याद्वा दास्येन सार्माप्यं अथ भगवदुपासकस्य शुद्धदासत्वं, तथा व्यासस्य परमात्मगुणविशिष्टो भगवान् सेव्यः । कर्मव्रतादेस्त्यागात् "जिज्ञासितमधीतं च ब्रह्म यत्तात् सनातनं" इति च नारदं प्रति महात्म्यानुवादाच्च "सवै भवान् वेदसमस्तगुह्यमुपासितो यः पुरुषः पुराणः" इति नारदोपदेशानन्तरं "अपश्यत् पुरुषं पूर्णं मायां च तदुपाश्रयाम् । अनर्थोपशमं साक्षात् भक्तियोगमधोक्षजे" इति फलं । ब्रह्मणः सर्वरूपः सर्वेश्वरत्वेनोपास्यः' द्वितीये विराटरूप-धारणमुक्त्वोपसंहारे-"एवं पुरा धारण यात्मयोनिः नष्टां स्मृतिप्रत्यवरुध्य तुष्टादिति" । येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहं इति । नारायणपरो वेद इत्यादिनोपसंहाराच्च, सर्वं पुरुष एवेदमित्यादि, तथाधिकारिका रुद्रादयोऽपि तथानधीकृता । "अंबरीषो वलिश्चैव प्रल्हादः पृथुरेव च । मालाकारो मनुश्चित्रकेतुश्चाथ रहूगणः । प्रियव्रतोऽजामिलश्च शतरूपादयस्तथा" इति ॥१३॥

एवं तु साधनानुसारेण भक्तिसुखास्वादतारतम्यं । तथापि व्रजस्त्रीणां माधुर्य्यतयातिशयेन सुखास्वादनं तत्र तु राधयापि विलक्षण—चमत्कारकारि-परममाधुर्यतया भक्तिरसास्वादनं । मनुस्वायम्भुवागमे नारदं प्रति शिववाक्य—"ब्रह्मानन्दरसादनन्तगुणितो रम्यो रसो वैष्णव,स्तस्मात्कोटिगुणोज्वलश्च मधुरः श्रीगोकुलेन्द्रो रसः । तच्चानन्त चमत्कृतिप्रतिमुहुर्वर्षद्रसानां परं श्रीराधापदपद्ममेव परमं सर्वस्वभूतं मम" । तथा ब्रह्माण्डे—"माधुर्य्ये मधुरा राधा महत्वे राधिका गुरुरिति" तस्मात् सर्वभक्तानां मध्ये श्रेष्ठत्वं सूचितं । तथा श्रीदशमे—"अनया राधितो नूनं भगवान् हरिरीश्वर" इति । ऋक्परिशिष्टे "राधया माधवो देवो माधवेनैव राधिकेति" । तथा गौतमीये "राधिका परदेवतेति" । ननु इतरेषां कथं रसविशेषोपि न आस्वाद्यते उक्तं—इतरे विद्यमानेऽपि तादृशदुग्धस्य परिमितत्वात्—दुग्धामोदक – दधिघृततक्रैरेव स्नेहोपादकत्वादिति हृदयं । किंच दर्शनं तद्विदां लोके आत्मनो भृत्यवश्यतामित्यत्र तद्विदां सर्व्वैश्वर्य्यज्ञानवतां भृत्यवश्यतां रसभरणीयवश्यतां तद्विदां गौणत्वमुक्तं । "इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन । मायाश्रितानां नरदारकेन साकं विजहुः कृतपुण्यपुञ्जाः" इत्यत्र उत्तरोत्तरोत्कर्षेऽपि गोपानां भिन्नत्वेन सर्वोत्तमत्वमुक्तं । ते तु ब्रह्महृदं नीता इत्यत्र च ब्रह्मवैकुण्ठयोः सुखे ज्ञानेऽपि उत्कर्षाभावाच्च । पुरस्थितेभ्योऽपि श्रेष्ठाः उचुः पौरा "अहो गोप्यस्तपः किमचरन् महत्" "पुण्यावत व्रजभुवो यदयं नृलिंगेतिः" "गोप्यस्तपः किमचरन् यदमुष्यरूपं लावण्यसारमसमोर्द्ध्वमनन्यसिद्धम् । दृग्भिः पिबन्ती"त्यादि द्वारकास्थितेभ्योऽपि श्रेष्ठः । रुक्मिण्यादीनां वाक्यं-न वयं साध्वि साम्राज्यमित्यादश्युक्त्वा पादरजः कामयामहे इत्युक्तं तत्रायमभिप्राय

गूढं यद्यपि सर्वदा व्यवधानेन स्थितिः तथापि ऐश्वर्य्य-मिश्रतया केवलस्वरूपप्राप्तिरतिदुर्लभेति ज्ञापयितुं चरणरजस उत्कर्षो वर्ण्यते व्रजस्त्रियो यद्वाञ्छन्ति पुलिन्द्यस्तृणविरुधः, गावश्चारयतो गोपाः पादस्पर्शं महात्मनः इति। रसेऽर्जुनोद्धवादीनामाधिक्यम्। तत्र चार्जुनः नित्यशरणः श्रीकृष्णवत् प्रादुर्भावः। 'अर्जुने तु नरावेशः कृष्णो नारायणः स्वयमिति' तन्त्रोक्तेः। चतुर्थे-'ताविमौ वै भगवतो हरेरंशाविहागतौ। भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ'। भीष्मपर्वणि भीष्मवाक्यं 'एष नारायणः कृष्णः फाल्गुनश्च नरः स्मृतः। नारायणो नरश्चैव सत्वमेकं द्विधाकृतिः। एतौ हि कर्मणा लोकान् अश्नुवते क्षयमध्रुवान्। अक्षयश्चाव्ययश्चैव यथा लोके पितामहः। तथैव भगवन्तौ तौ नरनारायणावुभौ"। तत्रैव संबन्धे-'अर्जुनः पाण्डवश्रेष्ठः पुरन्दरसुतो बली। नरः प्रजापतिर्वीरः पूर्वदेहः सनातनः" इति। तथा द्रोणपर्वणि"पूर्वदेवौ महात्मानौ नरनारायणावुभौ। एकात्मानौ द्विधाभूतौ दृश्येते मानवौ भुवि" ऐश्वर्य्ये बलदेवसात्विकीप्रभृतीनामाधिक्यं, ऐश्वर्य्यास्वादने रुक्मिण्यादीनां, रसे सत्यभामादीनामाधिक्यम्। द्रौपदीसुभद्रोत्तरादीनां शुद्धरसे युधिष्ठिरादीनां मिश्ररसे, श्रीशुकस्य शुद्धो रसोऽन्यथान्येन ब्रह्मसुखमग्नस्याकर्षणासंभवात् उक्तं च प्रथमे-स वै निवृत्तिनिरत इति प्रश्नानां परिहारः इत्थंभूतगुणो हरिरिति। शौनकस्य भगवत्ताविशिष्टश्रीकृष्णविषयो रसः। 'सूत जानासि' इत्युपक्रम्य 'तरवः किं न जीवन्ति' 'यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे' इत्युपसंहारात्। श्रीसूतस्य रसात्मकः श्रीकृष्णः, यत्कृतः कृष्णसंप्रश्न इति प्रशंसनात् ॥१४॥

अथ भक्तभेदाः-आर्त्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभेति'। भगवति कृष्णे नतु रसरूपे स्वपरसामर्थ्यराहित्ये कायवाङ्म-

मनोभिरीश्वरनिष्ठत्वं आर्त्तत्वम। ते गजेन्द्र-राजादयः। ईश्वर-भक्तभक्तीनां तत्त्वाद्रूपेण ज्ञानेच्छुः जिज्ञासुभक्तः मैत्रेयरहुगणादयः। अन्यनिराकरणादीश्वरादर्थेच्छुरर्थार्थी ते ध्रुवरुक्माङ्गदादयः। सर्वत्रेश्वरदृष्टित्वे सत्यपि भजनवान् ज्ञानीभक्तः ते सनकादि-नवयोगीन्द्रादयः। किंचान्ये भक्ताः परिभाषिकाः न तु भक्तियुक्ताः। यथा बृहन्नारदीये"शिवे च परमेशाने विष्णौ च परमात्मनि। समबुद्ध्या प्रवर्त्तन्ते ते वै भागवतोत्तमाः"। स्कान्दे-"धर्मार्थं जीवितं येषां सन्तनार्थं च मैथुनम्। पचनं विप्रभिक्षार्थं ज्ञेयास्ते वैष्णवाः नराः"। विष्णुपुराणे-"न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षे। न हरति न च हंति कंचिदुच्चैः सितम-नसं तमवैहि विष्णुभक्तम्" इत्यादौ वेदरूपभगवदाज्ञाया अनु-लंघनात् प्रजास्वरूपेषु वर्णाश्रमेषु भक्तत्वमुच्यते प्रशंसार्थं न तु भक्तत्वं। तृतीये-"यस्य वाचा प्रजाः सर्वा गावस्तंत्येव योजिताः। वलिं हरंत्यवनतास्तस्मै मुख्याय ते नमः" इति। उक्तं च भग-वन्नामकौमुदीकृद्भिः-उपलक्षणमेतत् शाखाग्रमिव चन्द्रस्य न तु भक्तिः उत्तरश्लोकेन भक्तेः पृथगुपादानात्। "मनसि कृतवृता-यनं मनुष्यं सततमवैहि हरेरतीवभक्तमिति"। किं च तर्हि स्मा-र्त्तभक्तयोः पृथगभिधानं दृश्यते ततोऽयमर्थः-शिवे तामसत्व-निंदोपेक्षे वैष्णवै नेकार्य्ये इत्येतदर्थं वैष्णवत्वमुच्यते। किं च भगवच्छिवयोर्भेदोऽस्ति न वा। तत्राह-भेदे प्रशंसार्थमेव समत्वं अभेदे वाक्येन विधानं व्यर्थं नहि राघवेन्द्रोपासकाः नृसिंहं निन्दन्ति, किं च वैष्णवे-विष्णुशिवयोः समतां पश्यन् पाषण्डी स्यात् तथोक्तं वैष्णवतन्त्रे-"यस्तु नारायणं देवं ब्रह्मरुद्रादिदै-वतैः। समत्वेनैव पश्येत स पाषण्डी भवेद्ध्रुवमिति"। एवं जातीयकानि वाक्यानि पद्मपुराणे बहुशः एवं धर्मार्थं जीवित-

मित्यादिकं तु भगवदाज्ञारूपवेदैकदेशप्रतिपादिकार्थकर्त्तृत्वेन वैष्णवत्वं न तु दासत्वं एवं न चलति निजेत्यादि ज्ञेयं। विष्णो- रयं वेदप्रतिपादितवर्णाश्रमादिधर्मकर्त्ता वैष्णवः अष्टौ वर्णा- श्रमाः प्रजाः नतु दासाः यथा महाराजस्य एके प्रजाः एके सेवकाः एके सम्बन्धिनः, एके दासाः तद्वत्। तथाहि प्रजाः कृष्यादिना जीवन्ति चौर्य्यादिना म्रियंते। सेवकाः नित्यसेवायां द्रव्यादिकं प्राप्नुवन्ति,-अन्यथौदासिन्यं। सम्बन्धिनस्तु सम्बन्धत्वेन पोष्याः, दासास्तु स्वशरीरवदनन्तराः। तथा भगवति। वर्णधर्मा- श्रितो वर्णः वैष्णवशब्दपर्य्यायः। एवमाश्रमोऽपि। ततश्च वर्णा- श्रमधर्मवत्वं वैष्णवत्वमिति पर्य्यायः, नियतार्थत्वात्। भजनेन भक्तत्वं भिन्नमेव। अन्यथा पार्षदानां भक्तत्वं न स्यात् वर्णाश्रमा- भावात्। यदि वर्णाश्रमधर्मवत्वं वैष्णवत्वं स्यात्तर्हि अम्बरीष पृथ्वादीनां भक्तानां तन्न स्यात्। अन्यत्र ब्राह्मणकुलादन्यत्राच्युत- गोत्रत इत्युक्तेः, वस्तुतस्तु वर्णाश्रमधर्मवान्स्मार्त्तः। भगवद्धर्म्म- वान् भक्तः। तथा तृतीयस्कन्धे-स चापि भगवद्धर्मात् काममूढः पराङ्मुखः। यजते क्रतुभिः देवान् अपि च श्रद्धयान्वितः इति। ज्ञानी प्रियतमो मे इत्यादौ तु कर्मनिष्ठापेक्षया। अन्यथा "ज्ञात्वाज्ञात्वाथ ये वै मां यावान् यश्चास्मि तत्वतः। भजन्त्य- नन्यभावेन ते मे भक्ततमामताः" इत्यत्र ज्ञानाज्ञानयोरौदास्यन्य- मुक्तम्। तस्माद्भक्तिमान् स एव वैष्णवः न त्वन्यः। एते तु रस- रूपादन्यत्र। दासत्वं तु विलक्षणमेव यथा दशमे"-तावद्रागादयः स्तेनास्तावत् कारागृहं गृहम्। तावन्मोहोंघ्रिनिगडो यावत् कृष्ण न ते जनाः"। तथा एकादशे"-कायेन वाचा मनसेन्द्रियैर्वा वुद्ध्यात्मनावानुसृतस्वभावात्। करोति यद्यत्सकलं परस्मै नारा- यणायेति समर्पयेत्तात्" इत्यादिना। एवंतु सख्यवात्सल्योज्व-

लानां तूत्तरोत्तरेणोत्तमत्वं ज्ञेयम्। यथा श्रीदशमे-"अहोभाग्यमहोभाग्यं नंदगोपव्रजौकसाम्। यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्"। तत्रैव-"यशोदा वा महाभागा पपौ यस्याः स्तनं हरिः" "गोप्यस्तपः किमचरन् यदमुष्य"त्यादिना। अथ भक्तिः तस्योत्कर्षं प्रथमे-"स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे। अहैतुकथप्रतिहता ययात्मा संप्रसीदति। अतो वै कवयो नित्यं भक्तिं परमया मुदा। वासुदेवे भगवति कुर्वन्त्यात्मप्रसादनीम्"। द्वितीये"अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन भजेत पुरुषं परम्"। चतुर्थे-"तत्कर्म हरितोषं यत् सा विद्या तन्मतिर्यया। हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः"। अथ भक्तिः "सेव्यत्वेन मतिः कृष्णे भक्ति रित्यभिधीयते"। अस्य स्तु भक्तेः सायोज्यातिरिक्तमभिलषितं फलं। "ज्ञानकर्माद्यभावेन भगवद्धर्म्म-सेवातः। द्रुतस्य मनसो वृत्तिः कृष्णे भक्तिरितिरीता"। तदुक्तं भागवते-"मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये। मनोगतिरविच्छिन्ना यथा गंगाम्भसोऽम्बुधौ। देवानां गुणलिंगानामानुश्रविककर्मणां। सत्व एवैक मनसो वृत्तिः स्वाभाविकी तु या। अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसीति'च। वस्तुतस्तु सा भक्तिः रसास्वादिका नतु भक्तिः रसात्मिका मूर्त्तिमतीभक्ति भिन्ना, मनसः द्रुतौ तादात्म्यापन्ना। ततश्चेयमास्वादपरिपाटी–एकादशरसांगा मधुरसशिरस्का श्रवणादिनवोपकरणा ततः क्रीडाप्रधानालम्बनपरिकरा मूर्त्तिमतिभक्तिरालम्बनान्यतरेण स्वचित्तद्रुतौ सजातीयधर्मेण सजातीयोपकरणपरिकरैः सह तादात्म्यापन्ना स्वाद्यते, न विजातीयैः जले पीतरक्तद्रवादिवत्। नहि जले पीतरक्तादिकाष्ठं तादात्म्यं भवति अपि तु सजातीयं काष्ठं तु निःशरीरभूतं तिष्ठति। तथा

प्रकृतेऽपि रसभक्तेः परिकरैकदेशगुणापि ज्ञानांगस्य ब्रह्मणः कर्ममार्गपरस्यापि न भक्तौ प्रवेश इत्यादि ज्ञेयाः । इदानीं नराणां तु (इदानींतनानां तु) चित्तद्रुतौ भक्तेरुपकरणस्य श्रवणादेरास्वादः श्रवणादिभक्तिः, अद्रुतमनसा भक्तेरनुपकरणस्य श्रवणादेर्ग्रहणं धर्मजनकं पापनाशकं वा मोक्षादिजनकं वा। तथा द्रुतमनसा भक्तेरपरिकरस्यैव ग्रहणं फलं मोक्षादीनां जनकम् । नन्वेकस्यैव श्रवणादेर्भक्त्याश्रत्वात्तस्य कथं भक्तित्वं भक्तिभिन्नत्वमिति चेत् सामग्रिवैचित्र्यात् देवदत्ते शत्रुमित्रादिवत् देवासुरयोर्विष्णाविव भक्तेनोच्चारिते कृष्णेति भक्तस्य भगवद्धर्मेण चित्तद्रुतौ भक्त्यास्वादः अभक्तस्य कर्मज्ञानाभ्यासाद्रुतचेतसा कृष्णेति ग्रहणं भक्तिभिन्नमिति भिन्नाधिकरणतयाचत्ताविषयत्वान्न विरोध इति भावः । अत एव ज्ञानकर्ममिश्रभगवद्धर्माश्रय-ब्रह्मत्व-विजातीयफलदातृत्वविशिष्टस्यास्वादः श्रीभागवतप्रामाण्यात्तथा तथा स्वीकरणीयम् । कुत्रापि श्रूयते ईश्वरत्वेन कुत्रापि परमात्मत्वेन कुत्रचिद्विभुत्वेन कुत्रचित् फलदातृत्वेन कुत्रचित् मोक्षदातृत्वेन कुत्रचित् ब्रह्मत्वेन कुत्रचित् भक्तवात्सल्यत्वेन कुत्रचिद्रसरूपेणेति अतएवानन्दवैचित्री । उक्तं पाद्मे-"ऐश्वर्यात्परमाद्विष्णो भक्त्यादीनामनादितः । ब्रह्मादीनां प्रसूयत्राह्यानन्दादेर्विचित्रते"ति । भक्तेरंगानि अद्भुतः वीरः रौद्रः करुणः भयानकः बीभत्सः हास्यः शान्तः प्रेयान् प्रीतः वत्सलः, अंगी उज्वलः विशेषस्तु भक्तिरसतरङ्गिण्यां, एतदधिकरणभूताः पंचविधा ज्ञेयाः पुरुष-स्त्री-पशु-वृक्ष-पक्षिण इति विवरणं तत्रैव । अथ साधनं ज्ञानमिश्रायां "सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतयां । विविक्तचीरवसनं सन्तोषं येन केनचित्" इति । कर्ममिश्रायां तु ईश्वरार्पणकर्मतपस्यादि, शुद्धायां तु ज्ञानकर्मसाधकसाधनसाध्य-

त्यागेन श्रवणकीर्त्तनादि। सर्वधर्मान् परित्यज्येति, त्यक्त्वा स्वधर्ममित्याद्युक्तेः। रसरूपायां तु त्रितयानुसंधानं विनानुरागेनैव प्रवृत्तिरित्यादिगुरूपदेशगम्यता सर्वत्र ज्ञेया। ननु भक्तेरसाधारणं कारणं किं-एकादशे-"यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत्। स्वधर्मेणारविन्दाक्ष तन्ममाख्यातुमर्हसी"त्युद्धवप्रश्नानन्तरं धर्मानुक्त्वा"इति मां यः स्वधर्मेण भजन्नित्यमनन्यभाक्। सर्वभूतेषु मद्भावो मद्भक्तिं लभते चिरात्" इति। "इष्टं दत्तं कृतं जप्तं मदर्थे यद्व्रतं तपः। एवं धर्म्मैर्मनुष्याणामुद्धवात्मनिवेदनम्। मयि संजायते भक्तिः कोऽन्येऽर्थोऽस्यावशिष्यते" इत्यादिना स्वधर्म इति चेन्न स्वधर्मे निष्ठानामृष्यादीनां भक्त्यश्रवणात्। तृतीये च- "सचापि भगवद्धर्मात् काममूढः पराङ्मुखः। यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयान्वित" इति, तत्रैव-"द्वादशैते बिजानीमो धर्मं भागवतं भट्टाः" इतिनियमो न स्यात्। देबानां शुद्धसत्वानामृषीणाममलात्मनाम्। भक्तिर्मुकुन्दचरणे न प्रायेणोपजायते" इत्यादिबाक्यबिरोधाच्च। न च क्षीणपापस्य भक्तिश्रबणात् पापाभावेन भक्तिरिति, उक्तं च-"नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते" इति बाच्यं। पापबतोऽपि भक्तिश्रबणात्, "अपि चेत् सुदुराचारो भजते मामन्यभाक्" इति। भक्तिसुधोदये च-"भगबति नृहराबनन्यचेता भृशमलिनोपि विराजते मनुष्यः। नहि शशकलषुच्छबिः कदाचित् तिमिरपराभबतामुपैति चन्द्रः" इति।

श्रीभागवतसिद्धान्तोऽऽराध्यो वैष्णबसंगतः।
प्रकाश्यते मया सिद्धः श्रीकृष्णाज्ञानुसारतः॥
साधकं बाधकं मिश्रं वैराग्यं त्रिबिधं स्मृतम्।
तथानुरागो बिज्ञेयः साध्यसाधकसाधने॥

ज्ञानं च त्रिविधं प्रोक्तमात्मोपास्यगुणानुगम् ।
अज्ञानमपि विज्ञेयमात्मोपास्यगुणेष्विति ॥

अथवैराग्यं—

ब्रह्माहमस्मीति ज्ञानं सर्वस्मिन् साधने रुचिः ।
इत्थं भूतं हि वैराग्यं भक्तौ साधकमिष्यते ।
श्रीकृष्णभक्तत्यानादेरभिवादे (कृत्सवादे) स्तथैवं च ।
शक्त्या श्रद्धादिना वापि वैराग्यं बाधकं स्मृतम् ॥
प्रकारभेदमाश्रित्य बाधकं साधकं च यत् ।
वैराग्यं मिश्रसंज्ञं तत् प्रोक्तं भक्तिरसानुगैः ॥
भक्तेरपोशकत्वेन प्रपंचांशो यदा मतः ।
तस्य त्यागो हि वैराग्यं साधकं मिश्रसंज्ञकम् ॥
प्रपंचो दुःखदत्वेन मिथ्यात्वादनिबारितः ।
एतादृशं तु वैराग्यमंशो बाधकमिष्यते ॥ इति

अथानुरागः—

भक्त्यानन्दास्वादने तु विषयत्वेन या रुचिः ।
साध्येऽनुरागो विज्ञेयः साधकोऽयं निरूपितः ॥
भक्तेतरैर्य आनन्दः साध्यस्तत्रानुरागिता ।
सैव साधकमित्याहुरनुरागविवेचनात् ॥
साध्येऽनुरागो मिश्रोहि प्रकारबलसंश्रयात् ।
भक्त्याधीनादिगुणके श्रीकृष्णे या रतिर्भवेत् ॥
सा साधकै र्विनिर्णीता रसज्ञैर्वैष्णवेष्विति ।
निरपेक्षे भगवति ह्याभासत्वेन या रतिः ॥
सा बाधकैव भक्तेषु श्रीकृष्णाकृतिदर्शनात् ।

इति त्रिविधः साध्यानुरागः ॥

अथ साधकानुरागः—

शुद्धभक्तेषु यो रागः सर्वथैवहि साधकः ।
अभक्तसाधके रागः सर्वदा बाधकः स्मृतः ॥
स शल्ये ह्यनुरागो हि मिश्रत्वेन प्रकीर्त्तितः ॥
अंशेन साधको ज्ञेयो ह्यंशेनैव तु बाधकः ।
इति साधकानुरागः ॥

अथ साधनानुरागः—

सिद्धे या स्यान्निवृत्तिस्तु नव(तत्र)रागस्तु साधकः ।
अन्नं ब्रह्मेति बात्मादिसाधने या रुचिर्भवेत् ॥
सा बाधकैव विज्ञेया ब्रजनिष्ठैस्तु साधकैः ।
एकादश्युपबासाद्यैः काम्या नित्या रुचिर्यदा ॥
हरिबासरतो बापि बाधिका च प्रकीर्त्तिता ।
इति त्रिबिधसाधनानुरागः ॥

अथात्मज्ञानं—

तदीयत्वेन यज्ज्ञानं साधकत्वेन कीर्त्तितम् ॥
ब्रह्मत्वेनात्मबिज्ञानं सर्बांशेनैव बाधकम् ।
ब्राह्मणत्वादिना ज्ञानं मिश्रं सद्भिरुदाहृतम् ॥
ब्राह्मणा भगबत्प्रजा इत्येवं बाधकं स्मृतम् ।
ब्राह्मणप्रकृतिर्भक्तिरित्येवं साधकं स्मृतम् ॥
इत्यात्मज्ञानम् ।

अथोपास्यज्ञानं—

सेव्यत्वेन ह्युपास्यस्य ज्ञानं साधकमीरितम् ।
निर्गुणत्वेन यद् ज्ञानं बाधकं भक्तिवर्त्मनि ॥
शुष्केश्वरात्मबिषयं मिश्रं बाधकसंमतम् ।
इत्युपास्यज्ञानम् ।

अथ आत्मगुणज्ञानं—

आत्मभेदस्य विज्ञानं साधकं रसवर्त्मनि ॥
जीवस्य यो ज्ञानगुणास्तज्ज्ञानं बाधकं स्मृतम् ।
प्रतीतिः शुद्धतायाश्च मिश्रत्वे परिकिर्त्तिता ॥
ब्रह्मत्वेन प्रतीतिस्तु सर्वथा बाधितैव हि ।
असंसारी प्रतीतिस्तु साधकैव सुनिश्चला ॥

इत्यात्मज्ञानम् ॥

अथोपास्यगुणज्ञानं—

भक्तवात्सल्यविज्ञानं सर्वांशे साधकं विदुः ।
उपेक्षायास्तु विज्ञानं सर्वांशे बाधकं स्मृतम् ॥
समतायाः प्रतितीश्च मिश्रत्वे परिकीर्त्तितम् ।
प्रकारभेदे समता भक्ताभक्तेषु बाधिका ॥
सैव शास्त्रेषु रसिता साधकैव प्रकारतः ।

इत्युपास्यगुणज्ञानम् ॥

अथात्मज्ञानम्—

सर्वांशे ब्रह्मताज्ञानं स्वमिन् साधकमिष्यते ॥
तदीयत्वेन यज्ज्ञानं सर्वकालेषु बाधकं ।
ब्राह्मणत्वादि यज्ज्ञानं प्रकारेणोभयात्मकम् ॥

इत्यात्मज्ञानं ।

अथोपास्यज्ञानं—

आनन्दादिप्रतीतिस्तु साधिका नतु बाधिका ॥
आनन्दरूपताज्ञानं बाधकं बिविधं स्मृतम् ।
संसारित्वस्य चाज्ञानं साधकं बाधकं स्मृतम् ॥
संसारित्वं द्वारकादौ तदभावस्तु लौकिके ।

इत्युपास्याज्ञानम् ॥

अथ आत्मगुणाज्ञानं—

क्रोधादिका प्रतीतिस्तु सर्वत्रैव हि साधिका ।
प्रयत्नेच्छाप्रतीतीनामज्ञानं सर्वबाधकम् ॥
श्रद्धाज्ञानं विमिश्रं हि लौकिकालौकिकत्वतः ।

इत्यात्मगुणाज्ञानम् ॥

अथोपास्यगुणाज्ञानम्—

न हि तस्य तृषादेस्तु यज्ज्ञानं साधकं स्मृतम् ।
क्षुधातृष्णादेरज्ञानं बाधकं परिकीर्त्तितम् ।
अज्ञानं निरपेक्षत्वे साधकं बाधकं तथा ।
साधकं भक्तविज्ञानमभक्तैः बाधकं हि तत् ॥
एतत्तु साधनैः साध्या भक्तिरेव रसात्मिका ।
भक्तेस्तु विषयः कृष्णः सैव तस्यापि वस्तुतः ॥
द्वयोः परिकरा ज्ञेयास्तथैव च विचारतः ।
आनन्दसत्यविज्ञानस्वरूपः कृष्ण एव हि ॥
त्रितयस्यापि विषयो भक्तिरेव प्रकीर्त्तिता ।
नहि भक्तिं विना कृष्णः स्वादयतां प्रतिपद्यते ॥
नहि कृष्णं विना भक्तिः कुत्रापि परिदृश्यते ।
ईदृग्विधौ विवेकस्तु गुहृतः कृष्णभक्तितः ॥
भगवद्धर्मशून्यं हि जनं नैवावलोकयेत् ।
ईश्वरस्य च विज्ञानं शुष्कं तन्निष्ठकान् जनान् ॥
न माता न पितेत्यादि गुणकं त्वीश्वरं क्वचित् ।
अस्मन्मतानुसारी यो नोपासीत कदाचन ॥१५॥

**इति श्रीनारायणभट्टविरचिते भक्तभूषणसन्दर्भे**

**भक्तभेदनिरूपणं नाम द्वितीयः परिच्छेदः ॥२॥**

अथ विश्वं विचार्य्यते—

तत्र केचिदविद्याकल्पितमात्मोपादानकं विवर्त्तं मन्यते। अन्ये तु आत्मनिमित्तामविद्यापरिणाममिति। अपरे ईश्वर-कर्त्तृकं परमाणूपादानकं जीवभोगार्थमिति। एके आविर्भाव-तिरोभावात्मकं नित्यमिति। अपरे सृष्टिप्रलयादिभावात्परिदृश्य-मानप्रवाहरूपेण नित्यमिति। आभिज्ञास्तु प्रामाणिकं भगवत् कर्त्तृकं क्रीडार्थं भक्तार्थमिति मन्यन्ते। तत्र आश्रमः प्रथमः कल्पः नियतः सृष्टित्वात् नहि स्थानावज्ञानात् मनुष्य एवा-रोप्यतेऽपितु अन्योऽपि। तथा ब्रह्माणि ब्रह्माण्डातिरिक्तस्यापि स्यात्। किंच केनारोप्यते इत्यादि विकल्पे ब्रह्मणि पर्य्यवसानं स्यात्। किं च विश्वं यदि मिथ्या स्यात् स्वप्नसादृश्यं स्यात् ओमिति चेत्तर्हि मनोरथेनापि सर्वं सुखादिकं प्राप्तं स्यात् क्रियो-पार्जितवत्। नहि स्वप्नमनोरथेनान्नादौ भुक्ते तृप्तिर्दृश्यते न स्वप्नादिवदिति न्यायात् च। स्वप्नमृगतृष्णादिवत् विश्वं मिथाभवितुं नार्हति कस्मात् वैधर्म्यात्। तत्र हि निद्राकरण-दोषो गृह्यते प्रवुद्धस्य बाध्यते स्वप्नस्यापि शुभाशुभकत्वान्न मिथ्यात्वं तथा जाग्रत्प्रसुप्तस्य न मिथ्यात्वं। ये तु बौद्धमतावल-म्बिनो मायावादिनस्तेऽप्यनेन न्यायेन सूत्रकारेण निरस्ता वेदि-तव्या इति। भाष्यकारकंठोक्तिः द्वितीयाध्यायद्वितीयचरणे। अन्यच्च सारूप्यं तत्वाग्रहं विद्याहानिबंधनं नहि किंचित् सारूप्यमस्ति येन कल्पितं स्यात्। ईश्वर-जीव-वेदसृष्टिविशिष्ट-वामदेव—स्वर्गापवर्गब्रह्महननाग्निहोत्रनरक—सर्वशास्त्रगौतमादीनां वेदप्रतिपादितानां लौकिकानां च जाग्रत्स्वप्नयोर्विविच्य सुख-दुःखादिकमनुभवतां हिताहितप्राप्तिपरिहारादनुभवतां प्रत्यक्षादि-प्रमाणानां वा भवतो वा (वाच्यं) बाध्यानन्तत्वं कल्पनीयं लाघवात्त्वमेव भ्रातः तत्वव्यवहारात्संवादाच्च च यदि सर्वस्य

ऽपि तु रजतसंसर्गः तथा प्रकृतेऽपि देहे आत्मत्वसंबन्धभावः आत्मनि शरीरत्वादि सम्बन्धस्येति, उक्तं च भाष्यकारेण फलाध्याये अनारब्धकार्य इति सूत्रविचारेऽपि पुनः मायामात्रवादिनस्तेषां क्वापि व्यवस्था नोपपद्यते इति अतः प्रपञ्चस्य वस्तुत्वमायाति द्वितीयाध्याये च केचिन्मायावादिनः "मृत्तिकेव सत्यमि"त्यत्र मायावादं संचारयन्ति तत्र ब्रूमः मृत्तिकाया अपि असत्यत्वं प्रपञ्चत्वात् ततः पारमार्थिक एव भेदः कार्यं भिन्नं प्रामाणिकं चेति भाष्यकारकंठोक्तिः उक्तं च रामानुजैः "ब्रह्मणो यदि दृश्यत्वं व्यावहारिकमुच्यते। प्रपञ्चस्यापि दृश्यत्वं तात्त्विकं किं त्वयोच्यते इति द्वितीयपक्षेऽपि अविद्या परिणतं वदतः स्वमतस्य स्वस्य च भ्रमत्वस्वीकारादुन्मादवदुपेक्षणीयः तृतीयपक्षेऽपि जीवभोगार्थमिति विश्वं विचारयिष्यामः। आविर्भावभ्रमत्वं तर्हि त्वया किमित्यगम्यान्निवर्त्तते किमिति च गर्हितः पुरुषस्त्यज्यते नहि रजतसर्पभ्रमवतोर्विशेषोऽस्ति यथा सत्यवादिनामस्माकं तथाऽसत्यवादिनस्तव दर्शनात् स्वयमेव भ्रान्तः वक्ष्यमाणश्रुत्यादिप्रामाण्यात्त्वमेव भ्रान्तः अलं भ्रान्तविवादेन अहो निर्लज्जतायाः प्रावल्यं येन ईश्वरत्वं शुक्तिरजतवदुच्यते किंच यथा ब्रह्मणः साक्षात्कारविषयत्त्वेऽपि सत्यत्वं तथा प्रपञ्चस्यापि अतएव दृश्यत्वं हेतुः सत्यत्वमेव जयति न च शुक्तिरजतेऽपि प्रसक्तिरुभयोः सत्यत्वात् नहि शुक्तिरजतं न चास्तीति बाधो-

तिरोभावपक्षेऽपि न युक्तिः यद्वा यदि आविर्भाव-तिरोभावश्च स्यात् तर्हि मृतपुत्रस्यापि मातृपितृभ्याचरणेनाविर्भावः स्यात्, विधिनिषेधप्रवृत्तिनिवृत्तीनां च व्यर्थता स्यात्, आविर्भाव्याविर्भावादीनामपि नित्यत्वात् अनीश्वरवादिनां मतं जारजातोक्तिवज्ज्ञेयम्। इदानीमभिज्ञानां पक्षः विचार्य्यते ।

"नारायणे तु तत्वानां न कदाचित् प्रलीनता ।
नित्यानन्दशरीरत्वाल्लक्ष्मीभूमिवदिष्यते ॥
तेषां तु कार्यभूतानां तत्वान्यन्यानि सन्ति हि ।
सर्वब्रह्माण्डतत्वानां कारणानीति निश्चयात् ॥
एकैकशस्तु ब्रह्मण्डे तत्वानां भेद इष्यते ।
लीनता कार्यभूतानां कारणानां तु नित्यता ॥
तत्वात्मकस्य देहस्य रागादिरहितस्य वै ।
बिनाशो लीनता ज्ञेया नान्यतत्वस्य कुत्रचित्" ॥

तत्रेयं प्रक्रिया—सर्वाणि तत्वानि भगवत् पार्षदभूतानि नित्यानि आनन्दचिद्घनरूपाणि, यथा लक्ष्मीः श्रीवाराहभार्या भूमिश्चेति जडत्वे तु तत्वानां कार्यत्वेन यथा भूः कार्यभूता मृत्तिकात्मिका जडा शरीरिणा सा नित्या लक्ष्मीः श्रीनारायणाश्रिता नित्या बक्षस्थलबासिनी सुबर्णादिवैभबावस्थापन्ना या सा जडा तद्विदित्यर्थः । तदुक्तं ब्रह्मसंहितायां"योगनिद्रा भगवती तस्य श्रीरिब संगतेति" । ततश्च तेषां तत्वानां कार्यभूतानि वैभबाबस्थारूपाणि सर्वब्रह्माण्डतत्वानां नियंतृरूपाणि अन्यानि संनितानि तु सर्वब्रह्माण्डमन्वंतरनियंता महाकालस्तस्य महाकालस्य निकटे ब्रह्माण्डतत्वानि तेषु स्थितानि तत्वेषु लीयन्ते पुनरुत्पद्यन्ते च यथा बह्वयो लक्ष्म्यः तस्मिन् नरेन्द्र—दितिजेन्द्र—सुरेन्द्र—लक्ष्मी र्नाना बिभान्ति" इत्युक्तेः तस्मिन् राजनि युधिष्ठिरे न तु कुरुपाण्डवे सन्तु किमर्थं त्रिबिधानिति चेन्न अन्यथानुपपत्तिशब्दाभ्यां त्रिबिधसिद्धेः तथाहि एकब्रह्माण्डनाशे सर्वब्रह्माण्डनाशः स्यात् तत्वानां नष्टत्वात् एवमुत्पत्ताबपि तृतीये—"प्रबुद्धकर्मा दैवेन त्रयबिंशतिको गणः । प्रेरितोऽजनयत्स्वाभिर्मात्राभिरधिपुरुषं । परेण बिदयता (बिशता) स्वस्मिन् मात्रया बिश्वसृग्गणः । चुक्षभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचरा" इति । मात्राभिरंशैः न तु स्वरूपेण श्रुतिश्च

"अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपां" सरूपा इति तु पाठः शाखान्तरे—सरूपपदेनैवान्या कार्यरूपा प्रकृतिरायति तत्र विश्वं सर्वप्रमाणगम्यं प्रत्यक्षं तावत् आपशु-मज्ञानिनं पशुं च । तृप्तस्ताभ्यां तृणमन्नं च त्यजेत् वृष्ट्या-भावेन मनोरथेन भक्षणमावर्त्तते तथा विश्वमिथ्यावादि-नापि एवमनुमानादिभिरपि । अन्यथा मिथ्यात्वविशेषात् उभयं समं स्यात् । तथेव भाष्यकारोक्तं तृतीयाध्याये प्रथमचरणे "पुनः जागरितावस्थां मायामात्रमिति वदन्ति ते सूत्रकाराभिप्रायं नाशयन्तः श्रोत्रियजनं व्यामोहयन्तीति" श्रुतिश्च-"अक्षरात्संभ-वन्तीह विश्वं सत्यं लोकाः कर्मसु चामृतं यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः यस्मादेतत् ब्रह्मनामरूपमनन्तं च जायते तदेतत् सत्यं" इति तु मण्डूकोपनिषदि सत्यं प्रामा-णिकं नाशोऽपि प्रामाणिको व्याघातात् तथोक्तं भाष्य-कारेण तत्तु समन्वयादित्यधिकरणे तस्माद्यत् किंचित् मिथ्या-त्वप्रतीतिज्ञानमस्ति यथा प्रपञ्चास्तित्वमज्ञस्य तथैव ज्ञानिनः पुनः पुनः स एव किल नास्तीति कथं ग्राह्यं वचो भवे-दिति भाष्योक्ते प्रपञ्चः प्रामाणिकः न तु मिथ्येति, न च नित्यत्वं सत्यमनित्यत्वं मिथ्यात्वमितिवाच्यं परिभाषात्वात् अन्यथात्मसाक्षात्कारस्य मिथ्यात्वे मोक्षो न स्यात्, तत्वेवासं-सारसाक्षात्कारादपि मोक्षो न स्यात् मिथ्यात्वविशेषात् । न च सत्यविषयत्वं प्रयोजकमिति वाच्यं सत्यत्वाविषयत्वात् किंच विश्वस्य भ्रान्तित्वे यस्यैष महिमेत्यादौ यस्येषा भ्रांतिरिति स्यात् तवैष महिमेत्यादौ च तवैषा भ्रान्तिरिति स्यात् तथा मण्डू-कोपनिषदि प्रभवः सर्वभावानामित्यादिकं निरूप्य सृष्टिमुक्त्वा देवस्यैष स्वभाव इत्युपसंहृतं अन्यथा देवस्यैषा भ्रान्तिरिति स्यात् किंच मिथ्यात्वे स्वप्नजाग्रद्विषययोर्मिथ्यासत्यविभागो

न स्यात् अथावैतथ्यापनिषदि स्यप्रवृत्तावन्तश्चेतसा कल्पितं तदसत् वहिश्चेतसा गृहीतं सत् स्वप्नजाग्रत् बिषयमिथ्यात्वं सत्यत्वमुक्तं तथा जाग्रदेवं मनोरथबिषयस्य मिथ्यात्वं वाह्यस्य सत्यत्वं जाग्रतवृत्ताबपि अन्तश्चेतसा कल्पितं तदसत् बहिश्चेतसा गृहीतं हि सत् इत्यादि नत्वंते सदसतो वैयर्थ्यं दृष्टमित्युक्तं सत्यं परं साक्षात्कारे जाते विषयस्त्यज्यते नित्यत्वेनेति तात्पर्य्यं । विषयादीनामनित्यत्वं दुःसंगयुक्तत्व- (दुःखसयुक्त) मेव प्रयोजकं मिथ्यात्वस्याभासादेब हेयत्वाभावात् । अन्यच्च सर्वस्य मिथ्यात्वे स्वप्नधर्माणामेब मिथ्यात्वबिभागो व्यर्थता स्यात् । तथा आलातोपनिषदि "सर्वे धर्मा- मृषा स्वप्ने" इति, तथा श्रुत्यन्तरे-पृथिवीं च बायुं चाकाशं च देबाश्च मनुष्यांश्चोक्त्वा धर्मं चेति कारणत्वेनोपसंहृतं तस्माद्वा एतस्मादात्मन आकाशः संभूतः इत्यादिसृष्टिप्रतिपादिका श्रुतिरेवप्रामाणिकत्वमानयति न च लोकानुबादकत्वेनाध्यारोपापबादार्थमिति बाच्यं । प्रामाणिकस्यैबाध्यारोपात् अन्यथा वंध्यापुत्रादेरध्यारोपः स्यात् कण्ठोक्तं श्रीभाष्यकारेण सत्यस्य सत्यं प्राणा वै सत्यं यद्यसत्यं बिधेयं स्यात्तर्हि प्राणा वै असत्यं इति ब्रूयात् अतः प्रामाणिकः न चारोपे प्रतीतिमात्रं प्रयोजकं लाघबात् न तु प्रमितत्वमिति बाच्यं प्रामाणिकत्वस्य कुत्राप्यनंगीकारेण तत्वाभावात् साक्षात्कारस्य भ्रान्तत्वात् मोक्षो न स्यात् संसारतत्वज्ञानयो ज्ञतित्वात् । न च बिचारदशायां संमुग्धत्वेन भवत्स्वीकृतं सर्वं मयापि स्वीक्रियते इति बिचारान्तरं प्रमितं प्रतीतं वा पर्य्यबस्यतीति । किंच न चास्माकं स्थाप्यः पक्षोऽस्ति येन नियोज्यता स्यादिति बाच्यं सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि श्रुत्या सत्यत्वादि धर्माणां व्यबहारवत् स्वीकार्य्यत्वात् । किंच संसारभ्रमज्ञानस्यानादिसिद्धत्वात्तत्वज्ञानस्य सादित्वाद्दुर्बलत्वेन बाधकत्वा-

संभवात् प्रमेयवलमेव स्वीकरणीयं, नहि बाधितार्थं श्रुतिर्बोधयितुं शक्नोति । बक्षमाणश्रुतिस्मृतिपुराणागमादीनां प्रामाण्यात् सृष्टेः प्रामाणिकत्वं । मिथ्यावादिनोऽत्यंताभिनिवेशे पंचशस्त्रीयाः प्रतिभट्टीकरणीयाः बहुनामनुग्रहो न्याय्य इति न्यायाच्च । तर्काप्रतिष्ठानादिति सूत्राच्च । "असत्यमप्रतिष्ठंते जगदाहुरनीश्वरमिति" गीतोक्तेः । तस्मात् सृष्टेः प्रामाणिकत्वं सिद्धं तथैवोक्तं सूत्रकारेण-'वैधर्म्याच्च न स्वप्नवत्" अस्य भाष्यं-जगत्पक्षः स्वप्नमृगतृष्णावत् मिथ्याभवितुं नार्हति कुतो वैधर्म्यात् तत्र हि निरा- (निद्रा) करणदोषो गृह्यते ये तु बौद्धमतावलम्बिनो मायावादिनस्तेऽपि सूत्रकारेण निरस्ता वेदितव्याः इति तु कंठोक्तंश्रीभाष्यकारेण श्रीरामानुजैश्च । दृश्यत्वाद्विश्वमिथ्यावचसि विहितयो सिद्धयश्चात्र उक्ताः । पक्षादेः सिद्धयसिद्धयोर्नहि गतिरितरानापि वादांगमीदृक् इत्यादिना प्रामाणिकत्वं उक्तम् । इदानीं सृष्टेः प्रयोजनमुपन्यस्यते जीवभोगापवर्गार्थमेव सृष्टिरिति केचित् तत्तु विचारणीयं भगवत ईशत्वं जगत्कर्तृत्वं फलदातृत्वं ज्ञानादिमत्वं कर्त्तुमकर्त्तुमन्यथाकर्तृत्वं अस्ति न वा नास्ति चेत् लोकशास्त्रविरोधः स्यात् । अस्ति चेत्तर्हि जीवार्थमेवेति न नियमः । न चादृष्टाभावाद्भोगाभावः ततः परार्थमेवेति वाच्यं तर्ह्यदृष्टाभावात् नियन्तृत्वादिकमपि न स्यात् कर्मवादा एव वरीयान् । नहि कश्चित् प्रयोजनं विना लोके राजादिर्वेदे ब्राह्मणादिर्वा प्रवर्त्तते । नच ब्रह्मादौ ह्यलिकवत्कश्चन भोगो दृश्यतेऽपि तु मदीयं विश्वमेतावन् मात्रं अदृष्टाभावेऽपि उत्पत्तिस्थितिरित्यादिलीलाप्राधान्यात् सर्वानन्दकदम्बत्वं स्वभावो भगवतः । तथा च श्रुतिः-"भोगार्थं सृष्टिरित्यन्ये क्रीडार्थमिति चापरे । ईशस्यैव स्वभावोऽयमाप्तकामस्य का स्पृहेति" लीलाप्राधान्यमेवोक्तं मण्डूकोपनिषदि । लोकवल्लीलाकैवल्यमिति सूत्राच्च ।

न तस्य प्रवृत्तौ प्रयोजनं किंतु लीलाकैवल्यं स्वरूपचेष्टा या लीला तस्याः कैवल्यं केवलमिति भावः। यथा लोके परिपूर्णोऽपि राजा क्रीडां करोति इति भाष्यकारः। न हि स्वभावः पर्यनुत्यक्तुं शक्यते इति च। नारायणसंहितायां च सृष्ट्यादिकं हरिर्नैव प्रयोजनमपेक्षते। कुरुते केवलानन्दाद्यथा मत्तास्य नर्त्तनम्"-इति, लक्ष्मीपतित्वान्यथानुपपत्त्या नित्य एव भोगः स्वीकृयते श्रुतिपुराणागमादिषु। तथा पाद्मोत्तरखण्डे एकत्रिंशे-"यो वै नित्यपदो नित्यो नित्यभोगैकभोगवान्। ईशः सर्वस्य जगतः स वै नारायणः स्मृतः" इति लौकिकालौकिकयोरलौकिकस्य बलवत्त्वात्। तत्रैव "योऽसौ यज्ञेश्वरो यज्ञो जज्ञभुग् जज्ञकृत् बिभुरि"ति, "सर्वभोगभागिति"श्रुतेः। यथा पाद्मे-"क्रीडार्थं देवदेवस्य बिष्णोर्लीलाबिहारिणः। लोकैश्चतुर्दशविधैः सागरैर्द्वीपसंगतैरिति"। श्रीभागवते-"क्रीडार्थमात्मन इदं त्रिजगत् कृतं ते स्वाम्यं तु तत्र कुधियो पर ईश कुर्यु रि"त्यादि। अनुमानेऽस्य सुखत्वं नित्यवृत्तिगुणबिभाजकधर्मत्वात् रूपत्वादिबत्। नच संयोगपरत्वापरत्वादृष्टविषयत्वादिबत्-पृथक् व्यभिचार इति बाच्यं चार्वाकमतोक्तत्वात्। किंच लोकसिद्धातिरिक्तस्त्वया स्वीकृयते न वा नो चेच्चार्वाकमतप्रवेशः स्वीकृयते तर्हि वेदाद्युक्तं स्वीकृयतां लक्ष्म्या बक्षस्थलत्वाश्रित्यसंयोगः पार्षदानां नित्यत्वात्तन्निष्ठविषयत्वादीनामीश्वरज्ञानविषयत्वान्नित्यत्वं। बिद्याबिद्यादीनां नित्यत्वात्तद्धर्म्मतया धर्माधर्मयोर्नित्यत्वं। तदुक्तं श्रीदशमे-"श्रिया पुष्ट्या गिरा कांत्या कीर्त्या तुष्ट्येलयोर्जया। बिद्ययाबिद्यया शक्त्या मायया च निषेबितमिति"। भविष्यपुराणे चेति-"याः पृथिव्यभिमानिन्यो देवताः प्रथितौजसः। अचिन्त्यशक्तयस्तासां दृश्यन्ते मुनिभिश्च ताः। ताश्च सर्वगता नित्यं वासुदेवैकसंश्रया" इति। (श्रुतिश्च) अहं नित्यः स्वतेजो पन्नः प्रकाशः अथाह चेतनाश्चाचेतनाश्च तेजोवंता-

न्याकाश ( वंन्नान्या ) इति "। तथा नित्यभोगश्च पाद्मे-"ईशया सह भोगार्थं दिव्यमंगलरूपवान्" इति रेमे श्रियासौ जगतां जनन्या स्वज्योत्स्नया चंद्र इवामृतांशुः"। "अयं च जगदीश्वर्य्या कुमारो नित्ययौवनः। कन्दर्पकोटिलावण्यः संतस्थौ परमे पदे । भोगार्थं परमव्योम लीलार्थमखिलं जगत्"। तस्मान्नित्यो भोगः नित्या क्रीडा च ॥१६॥

ननु क्रीडायाश्चेष्टात्मकत्वात् कथं लीलायाः नित्यत्वं ब्रह्म-ब्रह्माण्डदैत्यादीनां नाशादिति चेत् भ्रांतोऽसि नहि सर्वनाशे ज्ञानेच्छादीनां नाशः तथा चेष्टादेरपि प्रामाण्येन नित्यत्वेऽवगते किमनुपपन्नं । तथा च श्रुतिः-"अथैनमाहुर्नित्यकर्मेति नित्यं तवासौ कुरुते अथैनमाहुः सत्यकर्मेति सत्यं त्वेवेदं विश्वमसौ सृजते" इति ॥१७॥

ननु चेष्टायाः नित्यत्वे युगपदेव त्रितयं स्यात् तस्मात् यथा भवता स्वेच्छा-ज्ञानादीनां नित्यत्वादपि युगपन्न स्वीकृयते यथा-स्माकमपि। वस्तुतस्तु युगपद्भवंत्येवेति ब्रूमः। ननु एकविषयत्वे त्रितयानां विरोधो न तु भिन्नविषयत्वे ब्रह्माण्डानामनन्तत्वात् । तदुक्तं--"क्वेदृग्विधाविगणितांडपराणुचर्यावाताध्वरोमविवरस्य च ते महित्वं," यद्वासुरादीना (नन्वसुरादीना) मनित्यत्वात् कथं तद्धननस्य नित्यत्वं कथं वा वृन्दाबनादीनां नित्याधिकरणत्वं द्वारकातोऽपि वैकुण्ठगमनादेः श्रूयमाणत्वात् कथं स्थितेर्नित्यत्वं। प्रियतो यतो लोकस्य बिरहादिश्रवणात् कथं विलासस्य नित्यत्व-मिति चेत् अत्र केचित्-नहि मेषादिराशौ सूर्यादिगमने कृते वृष-राशिगतपुरुषाणां नाशे सति तेषां गतेर्विच्छेदस्तद्वदत्रापि । किंच रसस्तु संयोगेऽपि त एव रसत्वं लभते तथाभासत्वं उक्तं च पाद्मे-"द्वापरादौ युगे भूत्वा कलया मानुष्यादिषु। स्वागमैः कल्पितैस्त्वं च जनान् मद्विमुखान् कुरु । मां च गोपय येन स्यात्

सृष्टिरेषोत्तरोत्तरा" । मार्कण्डेय उवाच । "ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति" । ब्रह्माण्डे-"अमोहाय गुणा विष्णोराकारश्चिच्छरीरता । निर्दोषत्वं तारतम्यं मुक्तानामपि दुष्करम् । एतद्विरुद्धं यत्सर्वं तन्मोहायेति निश्चयेति" । पाद्मे भगवद्वाक्यं-मोहार्थं "त्वामाराध्य तथा शंभो ग्रहिष्यामि वरं सदेति" वाक्यैः रससंगोपने तात्पर्य्यम् ॥१८॥

किंच वाक्यानां बहूनां विरुद्धानां भगवति भवात् (संभवात्) जीवैस्तु अन्यतरवाक्यार्थं स्वीकृत्य खलु भजनीयः । पाद्मे-"अस्थूलो ह्यनणुश्चैव स्थूलोऽणुर्विश्व एव वा । विरुद्धधर्मरूपोऽसावैश्वर्य्यात् पुरुषोत्तम" इति वाराहे च "अदय मोहं सृजाम्याशु जनान् संमोहयिष्यति । त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय । अतथ्यानि वितथ्यानि दर्शयस्व महाभुज । प्रकाशं कुरु चात्मानमप्रकाशं च मां कुरु" । स्कान्दे-"शिवशास्त्रेऽपि तद्ग्राह्यं विष्णुशास्त्रोपयोगि यत्" इति । तथाहि वृन्दाबनादीनां नित्याधिकरणत्वं, यथा भगवता वैकुण्ठादत्रागते वैकुण्ठस्य न शून्यता तथात्रापि अचिन्त्यशक्त्यादिना समत्वात्, प्रियवर्गस्य बिरहादिः किंतु (किं तु) मधुररसांगं न तु विरहः विदयमानेऽपि विरहदर्शनात्, न च श्रीकृष्णगमनस्य अक्रूरस्यागमनस्योद्धवेन संन्देशहरणस्य ब्रजस्यानां कुरुक्षेत्रगमनस्य शश्वच्छ्रूयमानत्वात् कथं ब्रजस्य नित्यविलासाधिकरणत्वमिति बाच्यं । उद्धवब्रह्मरुद्रादीनामगम्यत्वेन ब्रह्मप्रार्थनपरिपाटि-मर्यादाशास्त्रेन रसरूपस्य संगोपितत्वाद्रसस्यागाधतां प्रतिपादयितुं दुर्लभतां च ज्ञापयितुं सर्वरसज्ञैर्विज्ञेयम् । अन्यथा लक्ष्म्या अगम्योक्तिः कोटिशः वाक्यैश्च विरोधः स्यात् । किंच ब्रह्मसुखस्य वैकुण्ठपरमानन्दस्य च श्रीगोपाल-गोपस्य स्मृति-पथा-

रोहः स्यात्। अन्यच्च यथा श्रुतित्वे श्रीभागवतवाक्यानां बाधः स्यात्। तस्मात् श्रीशुकस्योपासकत्वादास्वादकत्वात् परमरहस्यं संगोपयितुमिति ज्ञेयम्। तथाहि-"मथुरा भगवान् यत्र नित्यं संन्निहितो हरिः"। "नित्यं गिरिबनेचराः," "वृन्दाबनं जनाजीव्यद्रुमाकीर्णं समां प्रियं"। "सर्वकालसुखाबहं"। "मित्राणीवाजिताबासद्रुतरुट् तर्षकादिकं"। तथा कृष्णोपनिषदि"बने बृन्दावने क्रीडन् गोपगोपीसुरैः सहेति"। ततः श्रीकृष्णस्याव्यभिचारिनियतं स्थानं श्रीमथुरापुरीवैभबावस्था श्रीकृष्णस्य नारायणतया वैभवलोकावस्था वैकुण्ठरूपा स्वरूपपराकाष्ठा श्रीकृष्णस्य च लोकपराकाष्ठा मधुपुरीति तु रसज्ञै ज्ञेयं न तर्कैः। तदुक्तं कृष्णोपनिषदि-"गोकुलं बनवैकुण्ठं तापसास्तत्र ते द्रुमाः" इति। तथा श्रुत्यन्तरे-श्रीनारायणमुपक्रम्य श्रीकृष्णस्यैबावधित्वमुक्तम् तथाहि नारायणोपनिषदि"वैकुण्ठबनलोकं गमिष्यति तदिदं पुरमिदं पुण्डरीकं बिज्ञानघनस्तस्मात्तादिहाबभासं ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यः सोपनिषदमधीते स सर्वेभ्योऽर्थेभ्यो विमुक्तो भवति स सर्वांश्च लोकानबाप्नोति" इति बनशब्देन श्रीवृन्दाबनाख्यमेबान्यथा बनपदं व्यर्थं स्यात्। नारदवाक्यं-"भुवि गोबिन्दबैकुण्ठं तस्मिन् बृन्दाबने नृप"!। "कृष्णोऽयं साक्षात् ब्रह्मेति" नारायणीश्रुतिः। तथा चाथर्वणे-कृष्णो वै परमदैबतं गोबिन्दान्मृत्यु बिभेति गोपीजनबल्लभो भुवनानि दध्रे" इति। तस्मात् श्रीकृष्णस्यैबाधिकत्वं श्रीनारायणादीनामवतारित्वं तथा तत्तल्लोकानामपि मधुपुर्य्यां तादात्म्यम् ॥१६॥

न तु तत्र लोके मधुपुर्य्यां इति सर्वावधित्वं श्रीनारायणस्य श्रूयते सत्यं तत्तु ऐश्वर्य्यमान्येबाबतारापेक्षया ऐश्वर्य्यरसयोरबाधत्वं श्रीकृष्णस्यैव। तदुक्तं बृहद्वामनपुराणे भृग्वादीन् प्रति ब्रह्मणोऽपि बाक्यं-"षष्ठिवर्षसहस्राणि मया तप्तं तपः पुरा।

नंदगोपव्रजस्त्रीणां पादरेणूपलब्धये। तथापि न मया प्राप्ता-स्तासां वै पादरेणवः" पुनः भृगुना प्रश्ने कृते किमित्यन्यान् भक्तान् विहाय प्रार्थ्यते तत्राह-

"नाहं शिवश्च शेषश्च श्रीश्च ताभिः समाः क्वचित्।
ब्रह्मानन्दमयो लोको व्याप्यवैकुंठसंज्ञितः ॥
तत्तल्लोकेऽपि तत्रस्थैः स्तुतो वेदैः परात्परः।
तुष्टोऽस्मि ब्रूहि भो प्राज्ञ! वरं यन्मनसि स्थितम् ॥
वेदा ऊचुः- नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत।
सगुणं ब्रह्म सर्वेदं वस्तुबुद्धिर्न तेषु नः ॥
ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम्।
आनन्दमात्रमिति यद्वदन्ति हि पुराविदः ॥
तद्रूपं दर्शयास्माकं यदि दत्तो वरो हि नः।
श्रुत्वैतद्दर्शयामास स्वलोकं प्रकृतेः परम् ॥
केवलानुभवानन्दमात्रमक्षरमव्ययम्।
यत्र वृन्दावनं नाम वनं कामदुघैर्द्रुमैः ॥
शश्वद्रासरसोन्मत्तं यत्र गोपीकदम्बकम्।
तत्कदम्बकमध्यस्थः किशोराकृतिरच्युतः" इति ॥

यदि वैकुण्ठेश्वरयोरवधित्वं स्यात्तर्हि श्रीनारायणप्रसादफलं श्री-वृन्दावनं श्रीकृष्णश्च न स्यात्। तस्मात् वैकुंठलोकाद्यवधित्वं श्रीमधुपुर्याः ईश्वरत्वावधित्वं श्रीकृष्णस्येति निर्णीयते। अतो गमनादिकं रससंगोपनार्थमिति। ननु तर्हि ब्रह्मादयः किमिति न गोपयन्ति उपासनाभावात् आस्वादयाभावाच्च शाब्दमेव ज्ञानं तेषां अतएव श्रीशुकेन प्रियवर्गाणां तत्परिवाराणां च नामानिरु-क्तिः, तथा श्रीगोपालोपनिषदि-साक्षात् ब्रह्म श्रीगोपालपुरी हीति भवति, यथा हि सरसि पद्मं तिष्ठति तथा भूम्यां हि तिष्ठति इति

चक्रेण रक्षिता गोपालपुरीति भवति द्वाशशवने बसितामुक्त्वा ततो बैकुण्ठस्थदेवै रक्षिता वेष्टितेत्युक्त्वा पश्चात् ब्रह्मानारायणश्चे-त्युक्त्वा रामादिमूर्त्तिरुक्त्वा तत्रहि रामस्य राममूर्त्तिः एकां हि रूद्राः यजन्ति द्वितीयां हि ब्रह्मा यजति तृतीयां हि ब्रह्मजा यजंति इत्यादिना बिलासस्य श्रीकृष्णस्य चात्रधित्वं ज्ञेयम् । अतएव यत्र कुत्रचित् पूजकः श्रीमथुरामेव प्राप्नोति, तथोक्तं गोपालोपनिषदि-"स एवाव्यक्तानंतो नित्यो गापाल एवाव्ययो मथुरायां स्थितिः ब्रह्मन् सदा भबिष्यति," ब्रह्माणं प्रत्युक्तिः—"मथुरामण्डले यस्तु जम्वुद्वीपे स्थितोऽपि वा । योऽर्चयेत् प्रतिमां प्रीत्या स मे प्रियतरो भुवि" । तथा स्वायंभुवागमे पञ्चाशीतिपटले-"स्वात्मानंद-सुखोत्कर्षशब्दादिबिषयात्मकम् । वृन्दाबनं कुसुमितं नानावृक्ष-बिहंगमैः । संस्मरेत्साधको धीमान् बिलासैकनिकेतनमि"त्यनेन बिलासतादात्म्यं श्रीकृष्णे ज्ञेयम् । देशबिशेषे भक्तिबिशेषे अप्रतीतौ अपि सूर्य्यकिरणादिवत् ज्ञेयम् । तथा बायुपुराणे-"चत्वारिंशत् योजनानां ततस्तु मथुरा स्मृता । यत्र देवो हरिः साक्षात्स्वयं तिष्ठति सर्वदा । वत्सैर्वत्सतरीभिश्च सदा क्रीडति माधब" इति । भोजनशयनादिकमपि क्रीडैब । पाद्मे निर्वाणखण्डे भगवद्वाक्य"नित्यां मे मथुरां विद्धि वनं बृन्दावनं तथा । यमुनां गोपकन्याश्च तथा गोपालबालकान्" इति । अतो (अतीव) रसोद्रेकादैश्वर्य्यस्याप्रतीतेः नित्यत्वेनोपदेशः । तथा पाद्मे निर्बाणखण्डे"गोपालाः मुनयः सर्वे बैकुण्ठानन्दमूर्त्तयः" । बैकुण्ठे ये आनंदास्तेषां मूर्त्तयोऽधिष्ठातार इत्यर्थः । तद्येषां स्वभावः कः मुनयः रसमननस्वभावा इत्यर्थः । वौद्धायनेन सादरवाक्यं-"भुवि गोबिन्दबैकुण्ठं तस्मिनवृन्दावने नृप । यत्र वृन्दादयो भृत्याः सन्ति गोबिन्दलालसाः । तस्मिन् वृन्दाबने पुण्यं गोबिन्दस्य निकेतनम् । तत्सेबकसमाकीर्णं तत्रैब स्थियते सदा" । यथा

महारत्नं विदग्धैर्महता प्रबन्धेन संगोप्यते अविदग्धैः स्वल्पेनापि क्रयविक्रयेनः व्यवह्रीयते तथा श्रीकृष्णो मधु पुर्य्यां च। पाद्मोत्तरखण्डे-"शिशुपालं निहतं श्रुत्वा कृष्णेन योद्धुं मथुरामाजगाम। श्रीकृष्णस्तु तत् श्रुत्वा रथमारुह्य तेन योद्धुं मथुरामाययौ। कृष्णोऽपि तं हत्वा यमुनामुत्तीर्य नंदव्रजं गत्वा सर्वान् सन्तर्पयामास। कालिन्द्याः पुलिने रम्ये पुण्यवृक्षसमार्चिते। गोपनारीभिरनिशं क्रीडयामास केशवः"। एतैर्वाक्यैर्विलासस्य नित्यत्वम्। पातालखण्डे-"यमुनाजलकल्लोले सदा क्रीडति माधवः" इति। ततश्चायं फलितोऽर्थः सर्वावतारावतारिबीजं श्रीकृष्णस्तदधिष्ठानं श्रीमधुपुरी, तत्र रसात्मकं सिंहासनं श्रीवृन्दावनं, सभासदः श्रीव्रजदेव्यः, ततो बहिरावरणायाः (स्थानीयाः) श्रीनारायणादयः स्वपार्षदा-सहिता इति ज्ञेयम्। परमरहस्यं तत्तु श्रीकृष्णप्रियवर्गकृपया स्फुरति नान्यथा अज्ञाः स्वाज्ञत्वान्न वर्णयन्ति। श्रीशुकादयस्तु स्वकीयं सर्वस्वं महारत्नवत् प्रकारान्तरेणैतत् सर्वमनवद्यम्। तदुक्तमादिवाराहे-"वसन्ति मथुरायां ये विष्णुरूपाः हि ते खलु। अज्ञानास्तान्न पश्यन्ति पश्यन्ति ज्ञानचक्षुषः" इति। गोपालोपनिषदि-"चक्रेण रक्षिता मथुरा जन्मजराभ्यां भिन्नः स्थाणुरिति" ततो वनान्युक्त्वोपसंहारान्ते "एतैरावृता पुरीति"। कृष्णोपनिषदि"चिन्तयेच्चेतसा कृष्णं गोपगोपाङ्गनावृतम्"। तथोत्तरभागे कृष्णोपनिषदि-"वने वृन्दावने क्रीडन् गोपगोपासुरैः सहेति" तथा गोपालोपनिषदि-"तत्र हि रामस्य राममूर्तिः प्रद्युम्नस्य प्रद्युम्नमूर्तिः अनिरुद्धस्यानिरुद्धमूर्तिः" सप्त मुनयः ब्रह्मा नारायणश्च आवरणपरिपाटी ज्ञेयाः, श्रुतिः "वनेष्वेवं मथुरास्वेवं द्वादश मूर्त्तयो भवन्ति एकां हि वै रुद्रा यजन्ति द्वितीयां ब्रह्मज्ञा यजन्ति तृतीयां हि ब्रह्मा यजतीत्याद्युक्तं तत्रैव तत्र

तेष्वेव गहनेष्वेव देवा मनुष्या-गंधर्वा नागाः किंनरा गायन्तीति तत्र द्वादशादित्या एकादश रुद्रा इति"। श्रीमथुरायाः बाह्यवैभवं ब्रह्माण्डलक्षणं तदुक्तं श्रीगोपालोपनिषदि-"मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा। तत्सारभूतं यद्‌यस्मात् मथुरा सा निगद्यते। अष्टादिक् पालिभिः सेव्यं पद्मं विकसितं जगत्। संसारार्णवसंज्ञा ते (संजातं) सेवितं सममानसैः। चन्द्रसूर्यौत्विषो दिव्या ध्वजा मेरुर्हिरण्मयः। आतपत्रं ब्रह्मलोकमधस्तच्चरणं स्मृतमित्या"दिना श्रीमथुराश्रितवैभवं तु ज्ञेयम्। सर्वकामः सर्वरस इत्यादौ सर्वकामवत्त्वं सर्वरसवत्त्वं ज्ञेयम। रसं ह्येवायं लब्ध्वानंदी भवतीत्यादौ रसविशेषणं विधीयते न विशेषो (विशेष्यं) लोहितो स्मीषा प्रचरयन्तीतिवत्। "जयति जननिवासो देवकी-जन्मवाद"-इत्यादौ वर्त्तमानपदप्रयोगात् विशेष्यस्य नित्यत्वं यथा देवदत्तो पुत्रत्व-पितृत्व-भ्रातृत्व-विषयत्वादिधर्म्मैस्तेषां विशिष्टमबाधितमेव श्रीकृष्णेऽपि तत्तल्लीलाविशिष्टत्वात् तत्र प्रतिनियत्यत्वं तथाहि व्रजेश्वरीं प्रति"दाम्ना चोलूखले बद्ध" इति कृपया लीलाविशिष्टः श्रीदामोदरः व्रजदेवीप्रभृतिषु भविष्यपुराणोक्तलीलया तथाहि-"तस्मिन् दिने च भगवान् रात्रौ राधागृहं ययौ। सा च क्रुद्धा तमुदरे क्वचिद्दाम्ना बवंध ह। व्रजेश्वरी-महोत्साहवसात् कृष्णः सशंकितः। ततः प्रसन्नः श्रीराधां प्रतिवाक्यमसौ ब्रवीत्। किंचिद्दाम त्वया तन्वि उदरे यन्ममार्पितम्। दामोदरेति मे नाम प्रियं तेन शुभानने" इत्यादि ॥ ८॥

ऋग्वेदेऽपि श्रीवृन्दावनस्यैवाधिक्यं-"तां वां वास्तून् युष्मसि गमध्यै यत्र गावो भूरिशृंग्यो अयासः तदुरुगायस्य विष्णोः परमपदमवभाति भूरीति" वां युवयोः श्रीगोपीश्रीकृष्णयोः तां वास्तून् (तानिवांन) प्रसादत्वेन व्रजसंबन्धिलीलास्थानानि गमध्वै प्राप्तुं युष्मसि कामयामहे तानीति प्रकटयति यत्र व्रजे भूरिशृंग्यो

गाव: अयास: शुभा: सन्तीति शेष:, उरुगायस्याधिकर्त्तु: श्रीकृष्णस्य कामान् वर्षतीति विष्णुस्तस्य गोपिकासु कामवर्षकस्य तद्गोकुलं पदं वैकुण्ठस्थानमिति यावत् वैकुण्ठादपि परमं श्रेष्ठं भूरि सर्वरसपरमावधिरूपं । तथा तैत्तरीयके-"ते ते धामान् युष्मसि गमध्यै गावो यत्र भूरिशृंग्यो अयास अत्राह तदुरुगायस्य विष्णो: परमं पदमवभाति भूरिरिति, ते तव ते तानि धामानि स्थानानि भूरिरासोत्सवे बहुरूपत्वेन प्रतीतस्य, तदनन्तरमिति "विष्णो: कर्माणि पश्यत यतो व्रतानि पश्यसो इन्द्रस्य पूज्य: सखास्तद्विष्णो: परमं पदं सदा पश्यंति सूरय: दिवीव चक्षुराततं" सूरय: भक्ता: सदा नित्यं पश्यन्ति नित्यत्वात् तर्ह्यन्ये किमिति न पश्यन्ति दिवीव चक्षु: सर्वं पश्यति तथा विद्यमानेऽपि भक्त्यैव ज्ञायते इति कीदृशं चक्षुराततं सर्वरूपदर्शनात् परिच्छिन्नमपि आततं व्याप्तं । तर्हि गोकुलस्यापि आनन्दरूपत्वात् तस्य रस्यात् अस्यैव स्फुरणं परं सर्वमाधुर्यानुभवक्रमेणापि पित्ताक्रान्ते सितावत् । अतएवोक्तं त्वां कर्माणि पश्यत शरणं पश्यत गोवर्द्धनोद्धारणादीनि यदि न स्यु: तर्हि पश्यतेति नियमो न स्यात् तस्माद्वर्त्तत एव यत: कर्मदर्शनानन्तरं व्रतानि काम्यार्च्चनादीनि पश्यति निकटत्वात्, यद्वा यत: कर्मभ्य: लीलाप्राधान्यात यथा तृतीये"पश्यन्ति ते मे रुचिराण्यंव सन्त: प्रसन्नवक्त्रारुणलोचनानि । रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदन्ति । तैर्दर्शनीयावयवैरुदारविलासहासेक्षितवामसूक्तै: । हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो गतिमण्वीं प्रयुंक्ते" इति ॥२१॥

एवं तु भक्तवात्सल्यगुणविशिष्टेन भक्तेच्छानियामकतया प्रदर्श्यत इति वाच्यं अभक्तानां तु यथा तृतीये-"तान् शोच्यशोच्यानविदोऽनुशोचे हरे: कथायां विमुखानघेन । क्षिणोति देवो-

ऽनिमिवस्तु येशामायुर्वृथावादगतिस्मृतीनामिति"। व्रतानि आत्मारामत्वादीनि श्रीकृष्णः पश्यसे ववाधे स्पृशबाधनस्पर्शयोरिति धातो' लिटिरूपं। अयमर्थः स्वनिष्ठानि अन्यनिष्ठानि च प्रातिव्रतादीनि निराकृतवानित्यर्थः। यद्वा इन्द्रस्य व्रतानि यागादीनि, पश्यसे ववाधे। कीदृशः श्रीकृष्णः पूज्यः योगार्हः श्यामत्वाद्गोपीनां गौरत्वात् योग्या सत्वा समानशीलवानित्यर्थः। तस्माच्छ्रीकृष्णस्य लीलायाश्च सदैकरूपत्वं नित्यत्वं रसरूपं च ज्ञेयम्। तथा प्राकृतोपकरणानामानुकूल्येन नित्यत्वं प्रातिकूल्येनानित्यमिति। एवमानुकूल्येनाशुद्धमपि शुद्धं प्रातिकूल्येन शुद्धमप्यशुद्धं ब्राह्मचाण्डालयोरिव, भक्तिरसस्तु भक्त्यैव वेद्यो न तर्कादिना तस्मात् सर्वमनवद्यं ततश्च यथार्थेनैव भजनं कार्यं अन्यथा न भक्तिरसास्वादः तथा श्रुतिः–"योऽन्यथा संतमात्मानमन्यथा प्रतिपद्यते। किंते न तु कृतं पापं चोरेणात्मापहारिणेति"। यथा श्रीकृष्णस्य सर्वरसकदम्बत्वेन नित्यत्वं एशामवताराणामप्यंशत्वेन ॥२७॥

अथ वैकुण्ठादिलोका उच्यंते तत्र वैकुण्ठो ब्रह्माण्डश्च वैकुण्ठो भोगार्थो ब्रह्माण्डो लीलार्थ इति। तत्र वैकुण्ठस्त्रिविधः ब्रह्माण्डमध्ये आवरणमध्ये वहिश्च। त एव विचार्यते पाद्मे त्रयत्रिंशे-"भोगार्थं परमव्योम लीलार्थमखिलं जगत्"। भगवद्भोगार्थं ब्रह्माण्डरूपेण श्रीः स्थिता तत्र वैकुण्ठे मूर्त्तिमती। तदुक्तं तत्रैव-"लक्ष्म्या स्वरूपा सा व्याप्य जगत् कृत्स्नं व्यवस्थिता। तोयादिरसरूपेण सा लीलावपुर्भवेत्"। तत्र विश्वोदरे प्रकारः तत्रेयं प्रक्रिया-"चतुर्विंशतिभिस्तत्त्वैः परीता महदादिभिः। विद्ययाविद्यया शक्त्या मायया च निषेवितमि"त्यादिवाक्यैः शक्तित्वेन नित्यत्वं वैरूप्यं च, यथा यमुना द्वैरूप्यं तथा पृथिव्याकाशादीनां स्थूलं सूक्ष्मं च। तत्र स्थूलं परमाण्वादिरूपं सूक्ष्मं मूर्त्ति-

मत् । तत्राधिकारे प्रकृत्याः मुख्यत्वं नियंतृत्वं च प्रकृतेरपि नियात्मिका लक्ष्मीः । तत्रेश्वरेच्छया प्रकृत्यादिस्थूलरूपानामवयवेषु परमाण्वादिषु क्रियया द्व्यणुकादिप्रक्रमेण स्थूलरूपाः महदादयः उत्पद्यन्ते ततश्च सूक्ष्मरूपा महदादयो मूर्त्तिमन्तः स्थूलरूपेषु तादात्म्यापन्नास्तु कृपावलोकेन लब्धसामर्थ्याः ब्रह्माण्डं निर्माय भगवते निवेदितवंतः ॥ ३॥

ननु महदाद्युपक्रमेणैव सृष्टिर्न तु द्व्यणुकादिप्रक्रमेण सत्यं तत्तु अवयवबहुत्वे (अवयवद्वारा) यथा स्थूला पृथ्वी तथा चतुर्विंशतितत्वानां स्थूलावस्था प्राप्तानां ब्रह्माण्डरचने योग्यतोक्ता नत्ववयवावस्थां दूरीकर्त्तु तथोक्तं तृतीये–"चरमः सद्विशेषाणामनेकोनेकसंयुतः" इति "अणुद्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः" इत्यादि । भोगार्थं परमव्योमेति व्याप्यवैकुण्ठः सप्तावरणभेदानन्तरं यत्प्राप्यते । तदुक्तं पाद्मे–"प्रधानपरमव्योम्नोरन्तरे विरजा नदी । वेदांगस्वेदजनिततोयैः प्रस्तोषिता (प्रस्राविता) शुभा । तस्याः पारे परं व्योम त्रिपाद्भुतं सनातनं" इति । प्रधानाद्बहिः अक्षरं परमं धाम वैकुण्ठम् । शाश्वतं परमिति" कश्चन लोकः जलावरण–मध्ये तदुक्तं पाद्मोत्तारखण्डे चतुर्विंशे– जलावरणमध्ये तु वैकुण्ठं कारणं शुभम्" ब्रह्माडावरणमध्ये "द्वितीयं वैष्णवं लोकं शृणु वक्ष्यामि सुव्रते । योऽयं नित्य इति ख्यातो लोकोऽयं वैष्णवः स्मृतः"। श्वेतद्वीपं प्रसिद्धमेव । "तोयाब्धेरुत्तारे कूले श्वेतद्वीपमिहोच्यते । दुग्धाब्धौ वैकुण्ठलोको ब्रह्मलोकात्परेषतः" । वैकुण्ठलोकः यत्र सनकादयो गताः "वैकुण्ठो निर्मितो येन लक्ष्म्याः प्रियचिकीर्षया" इति चतुर्दशलोकेषु च चतुर्दशवैकुण्ठलोकाः भुवः स्थानेपि महाकालस्थानं वैकुण्ठलोकः एवमन्येऽपि नित्याः । तदुक्तं पाद्मे–" त्रिपाद् विभूते र्लोकस्त असंख्यः

परिकीर्त्तितः । सर्वे नित्या निर्बिकारा हेयरागबिवर्जिताः" । इति मोक्षपदबाच्यतापि तत्तल्लोकप्राप्तिरेब । पाद्मे–"तद्बिष्णोः परमं धाम मोक्ष इत्यभिधीयते । बिष्णोरनुचरत्वं च मोक्षमाहु–र्मनीषिणः" इत्यादि । श्रीभागबते–अधोक्षजालंभमिहाशुभात्मनः शरीरिणः संसृतिचक्रशातनम् । तद्ब्रह्मनिर्वाणसुखं बिदुर्बुधास्ततो भजध्वं हृदये हृदीश्वरम् ॥ पञ्चमे–"यथा वर्णबिधानमपबर्गश्चापि भवति, योऽसौ भगबति सर्वभूतात्मनि अनात्म्येऽनिरुक्तेऽनि–लयने परमात्मनि बासुदेबेऽनन्यनिमित्तभक्तियोगलक्षणो" अनेन गद्येन मोक्षस्वरूपमुक्तं अतः भक्तानां भिन्न एव मोक्षः अभक्तानां तु प्रीतिरेब मोक्ष इति बिबेकः किंच एहिकामुष्मिके (पञ्चबिधो मोक्षः) साधने भक्तिरेब साधनं फलं च तथा च श्रुतौ "भक्ति-रेवैनं नयति भक्तिरेवैनं दर्शयति भक्तिवशं पुरुषो भक्तिरेब भूयसी-ति" काठरश्रुतौ स्वरूपमुच्यते ।

प्रपञ्चस्य तु वस्तुत्वं भगबत् संग्रहेण वा ।
निवेदने तु शुद्धत्वं धातुत्वं (धातुजं) पुरटं यथा ॥
बिषयाभिनिवेशेन भोगवान् विषयी स्मृतः ।
तदभावे बिरक्तः स्यात् इत्येवं परमार्थता ॥
भक्तौ वैराग्यभोगौ तु ह्युदासीनतया मतौ ।
स्पृहा (महा) प्रसादस्वीकारो भक्तिरेव न भोगभृत् ॥
वैराग्यमुत्तरांगं हि व्यञ्जकं भक्तिवर्त्मनि ।
दाता तु भगवान् कृष्ण आत्मानमपि यच्छति ॥
इति ज्ञात्वा तु दातव्यं सर्वस्वं किमुतापरम् ।
तदीयत्वेन यद्दानं तद्दानं भगवत् कृतम् ॥
मदीयत्वेन यद्दानं तद्दानं प्राकृतं विदुः ।
भगवद्वस्तुना भोगो न कार्य्य अधिकारिणा ॥
प्रसादेनैब कार्यो हि तदभावाय बध्यते

वैकुण्ठवृन्दगुल्मानां भक्तानां चेश्वरस्य हि ॥
विग्रहो रूपचेष्टादिश्चिदानन्दतया मतः ।
प्रकृतीनां (प्रकृताणां) तु भक्तानां शरीरं नित्यमेव हि
चिदानन्दादिकं तस्मिन् सिद्धावस्थानुगं मतं ।
सच्चिदानन्दरूपं हि ज्ञापयन्ति हि केचन ॥
प्रतीतिर्नारदादौ हि वैष्णवासुरयोः यथा ।
भक्ते दृष्टविरोधो हि मूर्त्तिदेहादिदर्शनात् ॥
भक्तौ नैव तु न ग्राह्यः प्रतीकोपासने यथा ।
नारायणे तु तत्वानां न कदाचित् प्रलीनता ॥
नित्यानन्दशरीरत्वाल्लक्ष्मी — भूमीवदिष्यते ।
तेषां तु कार्य्यभूतानि तत्वान्यान्वसंतीति हि ॥
सर्वब्रह्माण्डतत्वानां कारणानीति निश्चयात् ।
एकैकशस्तु ब्रह्माण्डे तत्वानां भेद इष्यते ॥
लीनता कार्यभूतानां कारणानां तु नित्यता ।
मुक्तौ जीवस्य रागादेर्विनाशः शिष्टसंमतः ॥
न तु प्रकृत्यधीनानां तत्वानां च कदाचन ।
तत्वात्मकस्य देहस्य रागादिसहितस्य वै ॥
विनाशो लीनता ज्ञेया नान्यतत्वस्य कुत्रचित् ।
भगवद्धर्म्मशून्यं च जनं नैवावलोकयेत् ॥
ईश्वरस्य च विज्ञानं शुष्कं तन्निष्ठकान जनान् ।

**इति श्रीभास्करात्मजनारायणभट्टविरचिते**

**भक्तभूषणसन्दर्भे भगवद्धामनिरूपणं**

**नाम तृतीयः परिच्छेदः ॥**